6. On folio 5a of MS No. G 9605, folio 4b of MS No. G 8993, of the Asiatic Society, Calcutta Subuddhimiśra has been referred to in connexion with the interpretation of the verse *niḥśeṣacyutacandanam* etc. (K.p., Ch.I) :*ata evoktaṁ subuddhimiśraiḥ tasmād vācyavyaṅygyobhaya sādhāraṇo hetur ekatra bādhito' nyatra paryavasyatītyeva jyāya iti* / Unfortunately, the relevant portion is missing in the MS of the *Tattvaparīkṣā*, referred to above, where the text of the *K. P.* has wrongly superseded the Commentary in a few folios toward the beginning.

7. See M. Krishnamachariar, *History of Classical Sanskrit Literature.* Printed at Tirumalai- Trupati Devasthanams Press, Madras 1937 : pp. 735 and 861.

8. To note a few cases, for *kāvyagrahaṇahetvalaṅkāra vyutpādakatvenaitacchāstrasya alankāratvena prasiddhir iti sūcanāya tathopanyāsād ityeke* (under I. 1. 2), cf. *yadyapi kāvyaṁgrāhyaṁsaundaryāt* etc. in the *Kāmadhenu* (p. 9.); for *sarvaprāṇārpaṇenākarṣaṇam eva pūjanam iti nalopābhāveḍāgamāv ityanyaḥ* (under I. 2. 12), cf. *nanu yadyākarṣaṇam añcater a.thaḥ* etc. in the *Kāmadhenu* (p. 19.) for *nityaṁ gacchataḥ pānthatyam anyathā pathikatvam iti bhedam anādṛtya prayoga ityekaḥ* (underI.2.13) *cf. atra pathaḥ ṣkan* etc. in the *Kāmadhenu* (p. 20); *tataśca pratibhānasya prāganupādānaṁ cintyam iti yad kenacid uktaṁ tad eva cintyam* (under I. 3. 1), cf. *atra naisargikī ca pratibhā* etc. in the *Kāmadhenu* (p 24).

9. Mithila Institute of Postgraduate Studies and Research in Sanskrit Learning, Darbhanga, 1956 : pp. 10-13.

10. *Vāsavadattā* of Subandhu edited by Fitzedward Hall. Bibliothecs Indica, Calcutta, 1859 : p 54.

11. *A Second Report of Operations in Search of Sanskrit MSS in the Bombay Circle, April* 1883-*March* 1884. Extra Number of the *Journal of the Bombay Branch of Royal Asiatic Society*, 1884 : p. 17.

12. With the Commentary *Viveka* of Śrīdhara, Part I. Calcutta Sanskrit Collage, Series No. VII Sanskrit Collage, Calcutta 1959: p. XXX.

13. Text amended. MSS have *tatvaṁ* after. . . *śaktīnāṁ*. This makes no sense. Professor Daniel H. H. Ingalls suggests something like the following for the passage: "There is no fault; because poets who undertake their education in a given method *(tathāvidha)*, (despite the fact that) in their embryonic state (*prāgbhavīya*) they are potentially capable of any other method than the given one, are for the most part found in these geographical areas." Professor Ingalls is unwilling to accept 'easterners' as the meaning of the word *prāgbhavīya*.

14. The reference is to the verse *vacasi yam adhigamya* etc. cited in the *vṛtti* on 1. 2. 21. The word *pāka* used by Maheśvara should not be taken too strictly to cover what Vāmana exactly meant by it.

15. As Prof. T. Venkatacharya points out, under II. 1. 19. *veñ iti dhāto rūpam* (for *saṁvītam*) is wrong; the root shou!d be *vī*; *veñ* would give *uta*. Under IV. 2. 6, *ata eva puruṣavyāghra ityādau sāmānyāprayoga ityuktam* is a wrong reference; *sāmānya* is different from *vācaka* which is under discussion there.

16. Third Revised Edition, Firma K. L. Mukhopadhyay, Calcutta, 1961.

अप्ययदीक्षितकृतं वृत्तिवार्त्तिकम्

डा० ब्रह्ममित्र अवस्थी

निखिलशास्त्रपारावारपारीणः श्रीमदप्ययदीक्षित ऐसमीयषोडशशतकस्योत्तरार्धे-सप्तदशशतकस्य चादिमे भागे भारतभुवमलंचकार। अयं कर्नाटकप्रदेशीयस्य चिन्न-कोण्डाराज्यस्य वेङ्कटाभिधस्य राज्ञः प्रेरणया कुवलयानन्दं कर्त्तुम्प्रावर्त्तत इति तदीयान्येव वचांसि बोधयन्ति :—

'अमुं कुवलयानन्दमकरोदप्पयदीक्षितः ।
नियोगाद् वेङ्कटपतेर्निरुपाधिकृपानिधेः ॥'[1]

तदीयभ्रातृपौत्रेण नीलकण्ठदीक्षितेन संकेतितासु[2] शतसंख्यकासु कृतिषु केवलमष्टत्रिंशतां कृतीनां समुपलब्धिर्नामोपलब्धिर्वाद्य भवति । तासु सिद्धान्तलेश-प्रभृतयः षडद्वैतवेदान्ते, वरदराजस्तव प्रभृतयश्चतस्रो रामानुजवेदान्ते, न्यायरत्नमालैका माध्वसिद्धान्ते, शिवध्यानपद्धतिप्रभृतय ऊनविंशतिर्भक्तिसिद्धान्ते, नक्षत्रवादावलि-विधिरसायनाख्ये द्वे पूर्वमीमांसायां, नक्षत्रवादालिनामिकान्यैका कृतिः व्याकरणशास्त्रे, प्राकृतमणिदीपिका प्राकृतव्याकरणे, लक्षणरत्नावलिकुवलयानन्दचित्रमीमांसा वृत्ति वार्त्तिकाभिधाश्चतस्रः काव्यशास्त्रे समुपलभ्यन्ते श्रूयन्ते वा । सत्सु विविधविषया-स्वेतासु कृतिषु पण्डितवर्योऽयं काव्यशास्त्र एव महतीम्प्रतिष्ठामवाप । चित्रमीमांसा-खण्डने प्रवृत्तस्य जगन्नाथस्य प्रयासेन गौरवमस्य सुतरामवीवृधत ।

शास्त्रचिन्तनप्रसङ्गेऽप्ययदीक्षितस्य नवनवोन्मेषशालिनी प्रज्ञाऽऽचार्यपरम्पराभिः प्रौढिम्प्राप्तेऽपि सिद्धान्ते पुनर्विचाराय विदुषां शेमुषीम्प्रावर्त्तयत, तद्यथा–प्रकाश्यमान

१. कुवलयानन्द १७१, उपान्त्य पद्य

२. द्वासप्तर्ति प्राप्य समा प्रबन्धान्
शतं व्यधादप्पयदीक्षितेन्द्रः ॥ शिव लीलार्णव १.६

एवास्मिन्ग्रन्थेऽभिधानियमप्रसङ्गे मौलः सिद्धान्तो दर्शितः। तथाहि श्लिष्टेषु पद्येषु प्राकरणिकोऽर्थोऽभिधयाऽप्राकरणिकश्च व्यञ्जनया बोध्यत इति ध्वन्यालोककृत्। अयमेव पक्षः सिद्धान्ततया स्वीकृतोऽभिनवगुप्तमम्मटप्रभृतिभिः काव्याचार्यैः, परमस्य मते द्वयोरप्यर्थयोः वाच्यत्वमपि सम्भवति यथावसरम्। चित्रकाव्यप्रसङ्गेऽनेन प्रवर्त्तितस्सिद्धान्तः चित्रमीमांसायां न केषां विदुषां चेतसि प्रतिष्ठां न भजते।

शब्दशक्तिमधिकृत्य यथावसरं प्रवृत्तेन मया यथासाध्यं वृत्तिविवेचनविषयकाः ग्रन्थाः ग्रन्थांशाः वा एकत्र 'वृत्तिसमुच्चय'नाम्ना सुसम्पाद्य प्राकाश्यमानयितव्या इति विचारितम्। तत्प्रसङ्ग एव वृत्तिवार्त्तिकमप्यन्वेषयता मया मातृकैका विश्वेश्वरानन्द-वैदिकशोधसंस्थाने समधिगता। तद्दिनेष्वेव च दिल्लीस्थे हस्तिनापुर-महाविद्यालये प्राध्यापकस्य श्री देवदत्तकौशिकमहोदयस्यान्तिकेऽस्य ग्रन्थस्यैका प्रतिः समुपलब्धा। मुम्बई नगरान्मुद्रापिताप्येका प्राचीनतरा प्रतिरधिगता। तदधिकृत्यैव पाठसंशोधन-पूर्वकं सम्प्रति कल्पनायामेवावस्थितस्य वृत्तिसमुच्चयस्यांशात्मकः पण्डितप्रवरेणाप्पय-दीक्षितेन कृतो वृत्तिवार्त्तिकनामा ग्रन्थो विदुषां पुरतः समुपस्थाप्यते। सर्वा अपीमाः मातृकाः मुद्रिता वा प्रतिः लक्षणा विवेचनान्ता एव इति तावानेव भागोऽत्र निबद्धः। व्याख्यापूर्वकं वृत्तिसमुच्चयोऽचिरं समुपस्थाप्यःपुनरपीति मे धारणा। ग्रन्थस्यास्य काचिदपराः मातृकाः केषांचित्सविधे भवेयुश्चेत् संसूचनीयोऽयं जनः। इति।

(ग्रन्थांऽशोऽग्रिमपृष्ठादवलोकनीयः)

→

श्रीमदप्पयदीक्षितविरचितम्

वृत्तिवार्त्तिकम्

विश्वम्प्रकाशयन्ती व्यापारैर्लक्षणाभिधाध्वननैः ।
नयनैरिव हरमूर्त्ति विबुधोपास्या सरस्वती जयति ॥
वृत्तयः काव्यसरणावलंकारप्रबन्धृभिः ।
अभिधालक्षणाव्यक्तिरिति तिस्रो निरूपिताः ।
तत्र क्वचित्क्वचिद् वृद्धै र्विशेषानस्फुटीकृतान् ।
निष्टङ्कयितुमस्माभिः क्रियते वृत्तिवर्त्तिकम् ॥

तत्र—

शक्त्या प्रतिपादकत्वमभिधा ॥१॥

सा त्रिधा रुढिर्योगो योगरूढिश्च ।

तत्र

अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः ॥२॥

तन्मात्रेण प्रतिपादकत्वं च—अवयवार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्य प्रतिपाद्ये बाधाद्वा । यथा—

'यत्ते पदाम्बुरुहमम्बुरुहासनेड्यं,
धन्याः प्रपद्य सकृदीश भवन्ति मुक्ताः ।
नित्यं तदेव भजतामतिमुक्तलक्ष्मी—
र्युक्तैव देव मणिनूपुरमौक्तिकानाम् ॥

अत्र 'मणिनूपुरा'दिशब्दानां नावयवार्थप्रतिभासः, अतिमुक्तशब्दस्यावयवार्थप्रतिभासेऽपि वासन्तीलक्षणे प्रतिपाद्ये तस्य बाध (रुढितो यौगिकस्यार्थस्य बाधः) इत्येषां रूढिः। यद्यपि 'अतिमुक्तलक्ष्मीर्वासन्तीमुकुलशोभैव मुक्तातिशायिनी (मौक्तिकातिशायिनी) संपद्' इत्यभेदाध्यवसायार्थमतिमुक्तशब्दस्यावयवार्थोऽपि विवक्षितः; तथापि तस्य वासन्तीगतत्वेनाप्रतिपादनात्तत्र रूढिरेव। एतदव्याप्तिवारणेनैव लक्षणेऽप्येकपदमर्थवत्।

अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगः ॥३॥

यथा—

'ऊर्ध्वं विरिञ्चिभवनात्तव नाभिपद्माद्,
रोमावली पदजुषस्तमसः परस्तात।
मुक्तौघमण्डितमुरःस्थलमुन्मयूखं,
पश्यामि देव परमं पदमेव साक्षात्।"

अत्र 'विरिञ्चिभवन-नाभिपद्म-रोमावली' इत्यादि शब्दानां योगः।

अवयवशक्तिमात्रेण प्रतिपादकत्वमपि—समुदायार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्यावयवशक्तिप्रतिपाद्येऽनन्वयाद्वेति द्वेधा। तत्राद्यमुदाहृतम्। द्वितीयं यथा—

अस्तु त्रयीमयतनुस्तव लम्बनाली—
रत्नैस्तथापि परिभूयत एव भानुः।
सोढः सतां बत निशान्तमुपागताना—
मेवं तिरस्कृतिकृदीश्वर कः सुवृत्तैः॥

अत्र 'निशान्त' शब्दस्य निकेतनरूपसमुदायार्थप्रतिभासेऽपि 'निशान्तं' त्रियामावसानमुपगतानां सतां नक्षत्राणां तिरस्कृतिकृदन्तर्हितिकृत्, एवं गृहं प्राप्तानां सत्पुरुषाणां पराभवकृत्' इत्यभेदाध्यवसायार्थं तस्य विवक्षितत्वेऽपि त्रियामावसाने योग एव ।

अवयवसमुदायोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढिः ॥४॥

यथा—

'पक्षद्वयकृशिमपोषविभाव्यमान—
चान्द्रायणव्रतनिषेवण एव नित्यम् ।
कुर्वन्प्रदक्षिणमुपेन्द्र सुरालयं ते,
लिप्सुर्मुखाब्जरुचिमेष तपस्यतीन्दुः ॥

अत्र 'सुरालय' शब्दस्य 'सुराणाम् आलयः' इत्यवयवशक्त्या समुदायशक्त्या च कनकाचले योगरूढिः । न च अस्य शब्दस्य कनकाचले रूढिरेव केवलास्तु, मा भूद्योगरूढिः, [1]समुदाहृतश्लोके तपश्चर्योत्प्रेक्षायाः प्रदक्षिणीक्रियमाणस्य कनकाचलस्यावयवशक्त्युपस्थाप्यदेवालयाभेदाध्यवसायेनापि निर्वाहात् इति वाच्यम् । तत्रैवावयवार्थसम्भवेऽन्याभेदाध्यवसायरूपपरमुखनिरीक्षणायोगात् । तत्रैव यौगिकार्थप्रतिभासस्य सर्वसाक्षिकत्वाच्च । न च एवं सति देवागारसाधारणक्लृप्तावयवशक्तिमात्रेण कनकाचलेऽपि प्रवृत्त्युपपत्तेर्न तत्र समुदायशक्तिः कल्प-

१—'उदाहृत' क

नीया इत्यपि शङ्क्यम् । 'रत्नसानुः सुरालयः' इत्याद्यभिधानकोश स्मृतिपरम्परया विशिष्य तस्य तत्र समुदायशक्तेरपि सिद्धेः । अन्यथा देवतागार इव तत्र विशिष्यानुशासनानपेक्षणे तद्वैय र्थ्यापत्तेः । अत एवैतादृशपदे सति पुनः समुदायार्थवाचकपद प्रयोगे पुनरुक्तदोषोल्लासः ।

यथा—

'भद्राय भवतु भवतां भगवान्भजमानदैन्यतिमिररविः ।
दिवसारम्भविकस्वरनीरजनलिनाभिरामतरनयनः ॥"

यत्र योगरूढिमतोऽपि पदस्यावयवार्थशक्तिमूलप्रतीयमानार्थ-गर्भीकारेण तत्रैव विश्रान्तिः, तत्र समुदायार्थवाचकपदान्तर-प्रयोगेऽपि न पुनरुक्तदोषोल्लासः । यथा—

उद्यन्मृगाङ्करुचिकन्दलकोमलानाम्,
उन्निद्रशोणनलिनोदरसोदराणाम् ।
प्राप्तुं तवाधररुचामवलोकनेन,
नालं सहस्रनयनः स वृषापि तृप्तिम् ॥

अत्र 'सहस्रनयन' शब्दस्यावयवार्थशक्त्यावलोकनप्रकर्षसंभव प्रतीतेस्तत्रैव विश्रान्तिरिति पुनरिन्द्रवाचिपदप्रयोगः । यथा वा—

'तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥

(कुमार संभव ३.१०)

अत्र 'पिनाकपाणि' शब्दस्य शिवनाम्नोऽवयवार्थशक्त्या तदायुधसारत्वप्रतीतेस्तत्रैव तस्य विश्रान्तिरिति पुनः 'हर' पदप्रयोगः । ननु 'कुसुमायुधोऽपि' इत्यत्रावयवार्थशक्त्या तदायुधासारत्वप्रतीतावपि कामवाचिपदान्तरं नोपात्तमिति चेत्, न, तत्राप्युत्तमपुरुषाक्षिप्ताहम्पदस्य विशेष्यवाचिनः सत्त्वादिति[1] साहित्यचिन्तामणिकारः । वस्तुतस्तु नायं नियमः, यत् अवयवार्थ-शक्तिमूलप्रतीयमानार्थविवक्षायां समुदायार्थवाचिपदान्तरं प्रयोक्तव्यम्' इति, किन्त्वयमपि प्रकारोऽस्तीत्युदाहृतम् ।

तदप्रयोगे यथा—

'मन्ये निजस्खलनदोषमवर्जनीयम्,

अन्यस्य मूर्ध्नि विनिवेश्य बहिर्बुभूषुः ।

आविश्य देव रसनानि महाकवीनां,

देवी गिरामपि तव स्तवमातनोति ॥'

अत्र वागीश्वरीपदादवयवार्थशक्त्या प्रतीयमानस्य विद्या-विषये स्खालित्यापवादमितरवत्सरस्वती न सहते' इत्यर्थस्य वाच्य-स्योपस्कारकतया विवक्षितत्वेऽपि 'वाचामधिदेवतापि यत्र भगवतः स्तोत्रे न पर्याप्तं सामर्थ्यं बिभर्त्ति, तत्र कथमन्येऽधिकुर्युः' इत्यर्था-पत्त्यलंकारध्वननसत्त्वेऽपि पृथक्सरस्वतीवाचकपदप्रयोगः ।

१—'साहित्यचिन्तामणिः काव्यप्रकाशमनुसृत्य पञ्चदशमशताब्दी केन श्रीकण्ठेन त्रयोदशभिः परिच्छेदैः कृतोग्रन्थः । अत्र वीर-नारायणमाश्रयदातामुद्दिश्य प्रस्तुतान्युदाहरणानि ।

एकावलीकृतापि विशेष्यस्य साभिप्रायत्वं परिकरालंकारस्य लक्षणमभिधाय—

नरसिंह महीपाल कीर्त्तिस्त्रिपथगा तव ।
न कस्य भवति श्लाघ्या पुनाना भुवनत्रयम् ॥

इति तदुदाहरणे भुवनत्रयपवित्रीकरणोपपत्त्यभिप्रायगर्भं त्रिपथगापदं विशेष्यमेव प्रयुञ्जानेन तत्प्रयोगानियमो दर्शितः। तस्मात् योगरूढिमतः पदस्य यौगिकार्थशक्तिमूलप्रतीयमानार्थ गर्भाकारेण समुदायार्थवाचिपदप्रयोगाप्रयोगाभ्यां द्वैविध्यमेवोदाहृतम्, न पुनस्तत्प्रयोग[2]नियमः।

क्वचिद्योगरूढिमतः पदस्य विषयविशेषेऽवयवार्थानन्वयात्समुदायार्थमात्रे विश्रान्तिः। यथा—

उल्लासयत्युदरबन्धनिबन्धदिव्य—
शोणाश्मरश्मिकलिकावलिरच्युतैषा ।
आगाम्यनेकशतकल्पविधातृगर्भ—
नाभ्युद्गताम्बुरुहकुड्मलपंक्तिशोभाम् ।

अत्र 'अम्बुरुह'पदस्य भगवन्नाभिपद्मेऽवयवार्थानन्वयाद्रूढिरेव ।

क्वचित्तु समुदायार्थानन्वयादवयवार्थमात्रे तत्र विश्रान्तिः।

१—एकावली पृ० २५८
२—'प्रयोगे नि°' ख

यथा :—

कह्लारकैरवमुखेष्वपि पङ्कजेषु,
लोकेश यत्कमलमेव तथा प्रसिद्धम् ।
मन्येऽभिजात भवदास्यतुलास्य नेति
मर्मप्रकाशनमिदं विधिनैव क्लृप्तम् ।

अत्र 'पंकज'पदस्य कुमुदकह्लारादिषु समुदायार्थानन्वयाद्योग एव ।

नैयायिकास्तु पङ्कजादिशब्दरूपैकपदोपादानरूपान्तरङ्ग[1]-प्रत्यासत्त्या नाभिकमलकुमुदाद्यन्वयात्प्रागेव पङ्कजनिकर्त्तृत्व-वैशिष्ट्येनोपस्थितस्य पद्मत्वस्य, पद्माश्रयत्वेनोपस्थितस्य पङ्कजनि-कर्त्तृत्वस्य च नाभिकमलकुमुदाद्यन्वये नाकांक्षा; न चा-विशिष्टस्य तदन्वयविषयिणी शाब्दधीः, इति तदन्वयार्थं स्वतन्त्र-पद्मत्वपङ्कजनिकर्त्तृत्वोपस्थितये पङ्कजादिपदस्य लक्षणैवा-भ्युपगन्तव्या, न तु रूढिर्योगो वा । न च प्रथमं योगरूढिभ्यां स्वार्थोपस्थाने पश्चान्नाभिकमलाद्यन्वयार्थं विरुद्धवृत्तिमूकीभावे तदितरवृत्त्यैव स्वतन्त्रपद्मत्वाद्युपस्थितेराकांक्षादिसंभवान्न तदर्थ[2]-मिह लक्षणा इति वाच्यम्, केवलरूढ्यादिना स्वतन्त्रपद्मत्वाद्युप-स्थित्यर्थं शब्दस्य पुनरनुसन्धानकल्पनागौरवापत्तेः । लक्षणापक्षे तु नायं दोषः, पङ्कजनिकर्त्तृत्वसंवलितपद्मत्वरूपविशिष्टोपस्थिते-

१—'रूपयान्तर' ख. ग.

२—'तवर्थं' ब.

विशेषणविशेष्यान्यतरोपस्थितिलक्षणद्वारत्वेन द्वारे सति द्वारिणः पुनरनपेक्षणात् । न च शक्योपस्थितिलक्षणायामिव शक्योपस्थित्यन्तरेऽपि द्वारम् । येन रूढ्यादिना स्वतन्त्रपद्मत्वोपस्थितावपि पुनरनुसन्धानं न कल्प्येत-इत्याहुः ।

इत्थमभिधा त्रिविधा निरूपिता । सा चानेकशक्तिकस्य शब्दस्य संयोगाद्यैर्नियम्यते । तथाहुः —

संयोगो विप्रयोगश्च साहचर्यं विरोधिता
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ इति ॥

अर्थः=प्रयोजनम् । प्रकरणं च=वक्तृश्रोतृबुद्धिस्थता । लिङ्गम्=प्रयुक्तनानार्थपदवाच्यान्तरव्यावृत्तो धर्मः । शब्दस्यान्यस्य सन्निधिः=नानार्थपदैकवाच्यसंसर्ग्यर्थान्तरवाचिपदसमभिव्याहारः । सामर्थ्यं=कारणत्वम् । औचिती=अर्हता । व्यक्तिः=स्त्रीपुंनपुंसकम् शेषं प्रसिद्धम् । तत्र-'शंख चक्रधरो हरिः' इत्यत्र शंखचक्रयोगेन हरिशब्दस्य भगवत्यभिधा नियम्यते । 'अशंखचक्रो हरिः' इत्यत्र तद्विप्रयोगेन । 'रामलक्षणौ' इत्यत्र रामपदस्य लक्ष्मणसाहचर्याद् रघुपुंगवे । 'छायातपौ' इत्यत्र छायाशब्दस्यातपेन सह सहानवस्थानविरोधादनातपे । 'रामरावणयोरिव' इत्यत्र रावणेन सह वध्यघातकभावविरोधाद्रामपदस्य रामचन्द्रे । यत्तु रामार्जुनपदयोर्वध्यघातकभावविरोधाद्

भार्गवकार्त्तवीर्ययोरभिधा नियम्यते इत्युदाहरणम्, तत्र 'राम' पदस्य भार्गवेऽभिधा नियमने सति तद्विरोधप्रतिसन्धानेन 'अर्जुन' पदस्य कार्त्तवीर्येऽभिधा नियमनम्, तस्मिंश्च सति तद्विरोधप्रतिसन्धानेन 'राम' पदस्येति परस्पराश्रयापत्तेः। तस्मादन्यतर पदस्य व्यवस्थितार्थत्व एव स्मृततद्विरोधप्रतिसन्धानान्नानार्थपदस्य अभिधानियमनमिति प्रागुक्तमेवोदाहरणमनुसर्त्तव्यम्। इदं तु शब्दान्तरसन्निधेरुदाहरणं भविष्यति। 'हरिं मोक्षाय भजत' इत्यत्र मोक्षरूपेणार्थेन 'हरि' शब्दस्य भगवत्यभिधा नियम्यते। 'विवेश रामो दुर्धर्षं तापसाश्रममण्डलम्' इत्यत्र 'राम' पदस्य प्रकरणाद् रघुवीरे। 'कुपितो भूभृत्' इत्यत्र कोपलिङ्गेन पर्वत-व्यावृत्तेन भूभृदित्यस्य राजनि। संयोगोदाहरणे प्रसिद्धिप्राचुर्यम्, शंखादेरिन्द्रादावर्थान्तरेऽपि संयोगाविरोधात्। लिङ्गोदाहरणे तु सर्वथार्थान्तरव्यावृत्तिरिति भेदः।

'निषधं पश्य भूभृतम्' इत्यत्र जनपदविशेषसाधारणस्य 'निषध' पदस्य पर्वतवाचि'भूभृत्'पदसन्निधानात्पर्वतविशेषे नियम्यते। भूभृत्पदस्य च राजसाधारणस्य पर्वतविशेषवाचि-निषधपदसंनिधिना पर्वते। न चान्योन्याश्रयः। न ह्यत्र समभि-व्याहृतशब्देन तदर्थप्रतिपादनमभिधानियमनायापेक्ष्यते, किं तु स्वार्थेन गृहीतसंसर्गेऽर्थे व्युत्पन्नो यः शब्दः, तत्समभिव्याहार-मात्रम्। तथा च यथा सम्बन्धिदर्शनात्सम्बन्ध्यन्तरस्मृतिस्थले गृहीतसम्बन्धस्य संबन्धिनो दर्शनमात्रं सम्बन्ध्यन्तरस्मरणाया-

पेक्ष्यते, न तु तद्दर्शनानन्तरं तत्सम्बन्धस्मरणमपीति नान्यो-न्याश्रयः, तथेहापि 'निषध-भूभृत्'पदयोरभिधा नियमनाय गृहीत-स्वस्वार्थव्युत्पत्तिक'भूभृन्निषध'शब्दसमभिव्याहारमात्रमपेक्षते इति तत्तदर्थप्रतिपादनस्यानपेक्षणान्नान्योन्याश्रयः ।

नन्वेवं 'शंखचक्रधरो हरिः' इत्यादावपि 'शंखचक्रादि-शब्दान्तरसन्निधिनैवाभिधानियमनं भविष्यतीति व्यर्थं पृथक् संयोगाद्युदाहरणम्--इति चेत्, मैवम् । तत्र शंखचक्रादिशब्दानां नियतार्थतया श्रवणमात्रादर्थप्रतिपादकत्वेन तत्प्रतिपादितार्थ-संयोगादिभिरभिधानियमनसंभवात् । 'शब्दान्तरसन्निधिरपि तत्रा-स्ति' इति चेत्, अस्तु तथापि हरिशब्दाद्यभिधानियमनसमर्थे तदर्थसंयोगादिरूपसन्निहितसम्बन्धेनान्तरङ्गे शंखचक्रादावुप-स्थिते तत्रापि वाचकतया व्यवहितसम्बन्धेन बहिरङ्ग-शब्दान्तरसन्निधिर्नोदाहरणत्वमर्हति । अतो यत्र 'निषधं पश्य भूभृतम्' इत्यादावुभयस्य नानार्थतया न कस्याप्यर्थस्य प्रथममुप-स्थितिः, तत्रैव बहिरङ्गस्यापि तस्य नियामकत्वेनोदाहरणमिति न कश्चित् संकरः । यत्तु नियतार्थशब्दसामानाधिकरण्यं शब्दान्तरसन्निधिः तेन च 'देवस्य त्रिपुराराते:' इत्यत्र 'देव' शब्दस्य शंकरे नियमनम् । तत्र 'त्रिपुराराति'शब्दस्य नियतार्थत्वात् इति, तदयुक्तम् । समभिव्याहृतशब्दस्य नियतार्थत्वे तत्प्रतिपादित-लिङ्गादिनैव तन्नियमनात् । अन्यथा लिङ्गाद्युदाहणेऽपि शब्दान्तर-सन्निधेरेव नियामकत्वापत्तेः । न च 'सामानाधिकरण्ये शब्दान्तर-

सन्निधि:', वैयधिकरण्ये 'भूभृत: कोप:' इत्यादिरूपे 'लिङ्गादिकम्' इति भेद कथनम् । उभयत्र शब्दप्रतिपादितलिङ्गादेरेव नियामकत्वेनास्य भेदकथनस्य परिभाषामात्रत्वात् । 'व्यालो दानेन राजते' इत्यत्र 'व्याल-दान'पदयोरुभयोरप्यनियतार्थत्वेऽपि वैयधिकरण्येऽपि परस्परसमभिव्याहारेण दुष्टगजमदजलयोरभिधानियमनस्य सर्वानुभवसिद्धत्वेनावश्यसंग्राह्यत्वात्तदसंग्रहेण लक्षणकथनस्यात्यन्तायुक्तत्वाच्च । तस्मादुक्तैव शब्दान्तरसन्निधेः प्रक्रियादरणीया । 'मधुना मत्त: कोकिल:' इत्यत्र कोकिलमदकारणत्वरूपेण सामर्थ्येन वसन्ते 'मधु' शब्दस्याभिधा नियम्यते । 'भजत हरिं भवतापखिन्ना:' इत्यत्र भवतापहरणौचित्येन 'हरि'-पदस्य लक्ष्मीरमणे । अर्थोदाहरणे चतुर्थ्या कार्यत्वनिर्देश:, औचित्योदाहरणे तदुभयनिर्देशेऽपि योग्यतामात्रेण समभिव्यहारलभ्यकार्यकारणभावावगम:, इति भेद । 'क्षीरार्णवे हरि: शेते' इत्यत्र देशेन, 'प्रलये तिष्ठति हरि:' इत्यत्र कालेन च गरुडध्वजे 'हरि' पदस्य [शक्ति:] नियम्ते । 'मित्रो भाति' इत्यत्र पुंव्यक्त्या तपने सुहृद् वाचिनो नपुंसकत्वात् । 'तिस्र एव सायाह्नस्योपसद:, [१]

१—एवं प्रात: प्रवर्ग्यमनुष्ठाय, तत: प्रातरुपसदनुष्ठेया । सा अपूर्वा काचिदिष्टि: । तत्र अग्नि. सोम: विष्णु: इति प्रधान देवता: । सर्वत्र आज्यं द्रव्यम् । प्रायेणोपांशुयाजवत्प्रयोग: ।.........ततोऽपराह्णे आपराह्णिकौ प्रवर्ग्योपसदौ, सुब्रह्मण्याह्वानं च । एवं दिनत्रयं (द्वितीय तृतीय चतुर्थदिवसेषु) सायं प्रातरनुष्ठेयम् । यज्ञतत्त्वप्रकाश पृष्ठ ६५ (चिन्नस्वामीशास्त्रिसम्पादित, मद्रास ला जर्नल प्रेस् मद्रास)

द्वादशाहीनस्य' इति श्रुतौ अहीनपदस्य मध्योदात्तस्वरेणाहर्गण-साध्यसुत्याके द्वादशाहाख्यक्रतु विशेषे,[१] 'अह्नः स्वः क्रतौ' इत्य-नुशासनात् । 'हीनो' न भवति' इति नञ्समासे सत्यहीनपद-स्याद्युदात्तत्वात् । आदि शब्देनाभिनयोपदेशौ गृह्य ेते । अभिनयः= विवक्षितार्थाकृतिप्रदर्शको हस्तादिव्यापारः । उपदेशः=विव-क्षितार्थस्य शृङ्गग्राहिकया निर्देशः ।

परारिसन्दर्शितसन्निवेशो, मरुत्पराभूतसरोजकोशौ ।
इमावियन्तौ पुनरैषमस्ते कुचौ कियन्तौ परतो भवेताम् ॥

इत्यत्र तत्कालस्तनपरिमाणप्रदर्शकहस्तव्यापरेण 'इयत्' पदस्य परिमाण विशेषे,

---

१ (क)—अथायं द्वादशाह उभयविधो भवति, अहीनो वा सत्रं वा । स यदि उ ह एको दीक्षते अहीनो भवति, अथ यदि बहव सत्रम् । यदि चैवाहीनो यदि च सत्रमुभयथैवोभयतोऽतिरात्रो भवति । अन्यतरतोऽतिरात्रा ह्यहीनाः भवन्त्युभयतोऽतिरात्राणि सत्राण्या-देशादेवोभयतोऽतिरात्रो अहीनो भवति, आदेशात्तु सत्रमनति-रात्रम् । बौधायन श्रौतसूत्र प्रश्न २६ अध्याय ८, अनुच्छेद १२ पृष्ठ २८६ । संस्करण—एसियाटिक सोसाईटी कलकत्ता सन् १९०४ ई०

ख:—अत्र द्वादशाहे द्वादश दिनानि दीक्षाः । ततो द्वादशसु दिवसेषूपसदामनु-ष्ठानम्, अन्तिमोपसद्दिने आरम्भतश्चतुर्विंशे दिने उपसदनुष्ठानानन्तर-मग्नीषोमीय पशुयागानुष्ठानम् । तस्मिन्नेव दिने महारात्रे बुद्ध्वा सोमाभिषवार्थं क्रियाकलापानुष्ठानम् । श्वोभूते बहिष्पवमानादिः, तृतीये समाप्त्यन्तो व्यापारः, पुनर्यथावद्रात्रौ अभिषवक्रियानुबद्ध-कर्मकलाप इत्यादिद्वादशदिनपर्यन्तावर्त्तनीयक्रियाजातरूपाः द्वादश-सुत्याः ।—यज्ञतत्त्वप्रकाश पृ० १२६ ।

'इतः स दैत्यः प्राप्तश्री र्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥कुमार संभव २.५५

इत्यत्र 'इतः' इति स्वात्मनिर्देशेन तस्य वक्तरि परमेष्ठिन्यभिधा-नियम्यते ।

यत्र त्वनेकशक्तस्य शब्दस्याभिधानियामकम[1]नेकत्रा-विशिष्टमर्थे, तत्र नान्यतरस्मिन्नभिधा नियम्यते । यथा—

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो,
यश्चोद्वृत्तभुजङ्गहारवलयोगङ्गां च योऽधारयत् ।
यस्याहुः शिशिमच्छिरो हर इति स्तुत्यं च नामामराः,
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥

अत्र शिवकेशवयोरपि स्तुत्यतया प्रकरणमविशिष्टम् । अतः 'ध्वस्तमनोभवेन-नाशितमन्मथेन, बलिजित्कायः विष्णोर्विग्रहः,-पुरेष्वस्त्रतां नीतः, यश्चोद्वृत्तशेषवासुकिप्रभृतिनागराज-संपादितहारवलयकृत्यः, यश्च गङ्गामधारयत्, यस्य शिरः शशि-मदाहुरमराःस्तुत्यं नाम च 'हर' इत्याहुः । अन्धकासुरक्षयकरः स उमाधवस्त्वां सर्वदा पायात्' इति । अभवेन निःसंसारेण येन अनः शकटं ध्वस्तम्, येन च बलिजित्स्वस्य कायः पुरामृतमथने स्त्रीत्वं नीतः । यश्चोद्वृत्तं भुजङ्गं कालियं हतवान् रवे शब्द-ब्रह्मणि लयस्ताद्रूप्यापत्तिरस्येति रवलयः, उद्वृतभुजङ्गान् हतवदारवलयं चक्रमस्येत्येकं पदं वा, अगं गोवर्धनं गां वाराहा-

१—'मनेकत्र प्रविष्ट' क

वतारेण च योऽधारयत् । यस्य स्तुत्यं नाम 'शशिमच्छिरोहर' इत्याहुः, शशिनं मथ्नाति यो राहुस्तच्छिरोहर इति, अन्धकानां राज्ञां क्षयकरो निवासकृत्, 'सर्वदो माधवस्त्वां पायात्' इति चार्थद्वयेऽप्यभिधैव व्यापारः । अत एवात्र श्लेषोऽलंकारः ।

ननु च यत्रानेकत्र प्रकरणाद्यविशिष्टम्, तत्र भवत्वनेकत्राप्यभिधाव्यापारः । यत्र प्रकरणस्य क्वचिदर्थेऽवस्थितत्वे अप्यप्राकरणिकं शक्यान्तरं प्रतीयते, तत्र का गतिः । यथा—

असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥

इति चन्द्रोदय वर्णन प्रस्तावे । अत्र हि अप्राकरणिको भूपतिरभ्युदयादिविशिष्टः प्रतीयते ।

अत्र प्राञ्चः—'तत्र शब्दशक्तिमूलो व्यञ्जनाव्यापार एव शरणम्, गत्यन्तराभावात् । नहि तस्य तत्राभिधा संभवति, तस्याः प्रकरणेन नियन्त्रितत्वात् । नापि लक्षणा, मुख्यार्थबाधाद्यभावात् । न चाभिधायाः इव व्यञ्जनस्यापि प्रकरणेन नियन्त्रणे तेनापि न तन्निर्वाह इति वाच्यम्, तस्य धर्मिग्राहकमानेन तदनियम्यतयैव सिद्धेः । अत एव काव्यान्तर्निविष्टस्य प्राकरणिकंकिंचिदर्थनियताभिधाव्यापारस्याप्यसभ्यपदार्थान्तरप्रत्ययहेतोः पदस्य हेयत्वम् । अन्यथा तत्राभिधाया इव व्यञ्जनव्यापारस्यापि प्रकणेन नियन्त्रणेऽसभ्यार्थान्तरप्रत्ययासम्भवात् 'यस्याननं योनिरुदार वाचाम्' इत्यादावश्लीलदोषो न स्यात् । तस्मात् संयोगा-

दिभिरभिधा शृंखलिता यत्र कुण्ठतामेति, अर्थान्तरावगमने व्यञ्जनमेव क्षमं तत्र—' इति ।

वयं तु ब्रूमः—'असावुदयमारूढः'—इत्यादौ प्राकरणिकेऽर्थे प्राकरणिकवदप्राकरणिकेऽपि 'राज-कर-मण्डला'दिशब्दानां परस्परान्वयायोग्यनृपतितद्ग्राह्यधनदेशादिवाचकानां समभिव्याहाररूपमभिधानियामकमस्तीत्यर्थद्वयस्यापि प्राकरणिकत्व इव प्राकरणिकाप्राकरणिकरूपत्वेऽप्युभयत्राभिधैव व्यापारः, यथोक्त समभिव्याहारस्यापि शब्दान्तरसन्निधिरूपत्वेन प्रकरणवदभिधानियामकत्वात् । यैस्तु शब्दान्तरसन्निधिरन्यथा निरुच्यते, तैरपि यथोक्तसमभिव्याहारेण नानार्थशब्देभ्योऽर्थप्रत्ययस्य सर्वसिद्धत्वेन तस्य तद्भेदेनापि नियामकत्वमास्थेयमेव । वस्तुतोऽयमेव शब्दान्तरसन्निधिरित्यप्युक्तम् । न चाप्राकरणिके उक्तरूपशब्दान्तरसन्निधिमात्रम्, प्राकरणिके तच्च प्रकरणं चेति नियामकाधिक्यात्तत्रैवाभिधा स्यादिति वाच्यम्, प्रकरणादीनामभिधानियामकत्वं हि नानार्थशब्दजन्यशक्यस्मृतौ तेषामन्यतमकारणत्वम् । यथोक्तम्—'शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' इति । तथा च तेषु कस्यचिदपि समवधाने स्मृतिसामग्री पुष्कलैवेति किं तद्बाहुल्येन ?

यत्रैकमेवपदं नानार्थमप्राकरणिकेऽपि तात्पर्यवत् । यथा—

'करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तुतिम् ।[१]
हरे हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया ॥

शि० पा० व० १, ३६

१—'स्तवम्' ख, शिशुपाल वधे च ।

इत्यत्र 'हरि' पदम् । तत्रापि समभिव्याहृत'द्विप'पदप्रतीतगज-विरोधादिकमप्राकरणिके सिंहेऽप्यभिधानियामकस्त्येव।

अत्र तु 'यस्याननं योनिरुदारवाचाम्' इत्यादावश्लीले नैतादृशं नियामकम्, तत्रापि बुभुत्सितार्थव्यासक्तस्य मनस-स्तमुल्लंघ्यासभ्ये दुर्गन्धादौ प्रवृत्तिवत्प्रकरणनियन्त्रितस्यापि शब्दस्य तदुल्लंघ्यविषयस्वाभाव्यादश्लीले प्रवृत्तिरिति न क्वापि शक्तिविषये व्यक्तिरङ्गीकरणीया। यदि चैवंविधानि नियामकानि नाद्रियेरन्, तदोदाहृतस्थलेषु व्यञ्जनव्यापारोऽपि दुर्ग्रहः। तथाहि— प्रकरणादिकमुल्लंघ्य व्यञ्जनव्यापारेणाप्यर्थान्तरप्रत्ययो न सर्वत्र वक्तुं शक्यते, प्रकरणादीनामभिधानियामकत्वकल्पनस्यैव व्यर्थ-त्वापत्तेः। तद्धि नादृष्टार्थम्, किं तु 'सैन्धवमानव' इत्यादावेकार्थ-मात्रपरनानार्थशब्दस्थले अर्थविशेषस्मृतिव्यवस्थार्थं तत्। यदि तत्रापि व्यञ्जनव्यापारेणार्थान्तरप्रत्ययः स्यात्, तदा कथमेषा सिध्येत्। नह्यभिमतानभिमतक्षेत्रसाधारणस्य जलाशयस्या-भिमतक्षेत्रगामिनीमेकां कुल्यां विधायानभिमतक्षेत्रगामिनः कुल्या-न्तरस्यापि कल्पने जलस्याभिमतक्षेत्रैकगामित्वव्यवस्था कृता भवति। तथा च यत्र कवयितुश्चमत्कारायाप्राकरणिकेऽप्यर्थे तात्पर्यम्, यत्र वाश्लीलदोषः, तत्रैव व्यञ्जना व्यापारोन्मेषः, न सर्वत्रेति तद्व्यवस्था सिद्धये तत्र तत्र नियामकान्यस्मदुक्तानि अन्यादृशानि वावश्यमादर्तव्यानि तेषां चाभिधानियामकत्वमेव वक्तुं शक्यमिति व्यर्थस्तत्र व्यक्तिकल्पनापरिश्रमः। दुर्वारश्च तत्र

व्यक्तिवादिमतेऽप्यभिधा व्यापारः । तथाहि यदि शक्तिरभिधा, निर्विवादमस्त्येवाप्राकरणिकेऽपि सा । यदि च काव्यप्रकाशिका-द्युक्तरीत्या शक्यार्थप्रतिपादकत्वरूपः शब्दव्यापारः, सोऽप्यस्त्येव नहि तत्राप्राकरणिकशक्यप्रतिपत्तेः शब्दादन्यज्जनकम् । शक्ति-ग्रहमपेक्ष्य तत्प्रतिपादकत्वमभिधा इति चेत्, यत्राप्रकारणिकोर्थः, तत्रागृहीतशक्तिकस्याभिधया किं न प्रतीयते, येन स तत्र न स्यात् । ननु शक्त्या साक्षात्प्रतिपादकत्वमभिधा । साक्षादित्य-विशेषणे मुख्यार्थशक्तिग्रहमपेक्ष्य तत्प्रतिपादनव्यवधानेन तत्संबध्य-र्थान्तरप्रतिपादनरूपाया लक्षणाया अप्यभिधात्वप्रसङ्गात् । तथा च प्रागेवानुवर्त्तमानेन[1] प्रकरणेन तत्प्रमेयोपस्थापनं शीघ्रभावीति तद्व्यवधानेनार्थान्तरप्रतिपादनं नाभिधा इति चेत्, न । 'तद्विषयशक्तिग्रहमपेक्ष्य तत्प्रतिपादनमभिधा' इति लक्षणं विनैव साक्षात्त्वविशेषणं साधु, अनतिप्रसङ्गात् । तत्पदरूपेण पदभङ्ग-कृतपदान्तररूपेण वार्थान्तरप्रतिपादनव्यवधानाभावरूपसाक्षात्त्व-विशेषणस्य गुरुत्वात् । तथाविशेषणे 'येन ध्वस्तमनोभवेन'— इत्यादौ धूर्जटिपक्षे—स्फुटपदसम्बन्धितया प्रसिद्धिप्राचुर्येण च झटित्यर्थप्रतिपत्तिः । वैकुण्ठपक्षे—'येन ध्वस्तमनोभवेन—' इत्या-दावस्फुटपदसन्निधितया 'शशिमच्छिरो हरः, अन्धकक्षयकरः इत्यनयोरप्रयुक्तनिहतार्थत्वेनाप्रसिद्धितया च बिलम्बेन प्रतिपत्ति-रिति सर्वसिद्धत्वे तत्राभिधाविषयेऽपि तदभावापत्तेः । प्रकृताप्रकृतो-भयपरे यत्राप्रकृते प्रसिद्धतरम्, प्रकृतेऽप्रसिद्धतरं पदम्, तत्र

१—'प्रागेवार्थमनुक्तं' ख ग

प्रसिद्धिप्राचुर्येणाप्रकृतार्थप्रतीतेरेव प्राथमिकत्वेनाप्रकृतेऽभिधा, प्रकृते व्यक्तिः, इति वैपरीत्यापत्तेश्च । प्रकरणमुल्लंघ्यापि प्रसिद्धतरार्थस्यैव प्रथमं स्मृतेः । अत एव--'द्व्यार्थमप्रसिद्धेऽर्थे प्रयुक्तं निहतार्थकम्' इत्युक्तलक्षणस्य निहतार्थस्य काव्यदोषत्व-मुपगम्यते। प्रसिद्धतराप्रकृतार्थप्रतीत्या प्रकृतार्थप्रतीतेर्व्यवधानात् । न च निहतार्थस्य दोषत्वात्तत्प्रयोगोऽर्थद्वयविवक्षास्थलेऽपि काव्ये न संभवति इति वाच्यम् श्लेषयमकादिषु तस्य वृद्धै[1] र्दोषत्वाभाव-स्योपपादितत्वात् । 'अन्धक क्षयकरः', 'राजा हरति लोकस्य,' 'राजा राजार्चितांघ्रेरनुपचितकलो यस्य चूडामणित्वम्' इत्यादि दर्शनाच्च ।

तस्माच्छब्दस्यार्थप्रतिपादनोपयोगितत्प्रत्यासत्तिरूपधर्मभेद एव वृत्तिभेदप्रयोजको न तु तद्भेदाभावः । प्रतिपादनगत-साक्षात्त्वव्यवहितत्वभेदे सत्यपि शक्तिशक्यसम्बन्धरूपप्रतिपाद्य-प्रत्यासत्तिभेदेनैवाभिधालक्षणयोर्भेददर्शनात्, तद्भेदाभावे प्रसिद्धा-प्रसिद्धार्थगोचरशब्दश्लेषस्थले लक्षितलक्षणास्थले, व्यङ्ग्य-स्थले चार्थद्वयप्रतीत्योः साक्षात्त्वव्यवहितत्वभेदे सत्यप्यभिधालक्षणा-व्यक्त्यतिरिक्तवृत्त्यदर्शनाच्च, इत्यप्रयोजकस्याव्यवस्थापादकस्य च साक्षात्त्वविशेषणस्यायोगात्, 'तद्विषयशक्तिग्रहमपेक्ष्य तत्प्रति-पादकत्वमेवाभिधा' इत्यप्रकृतेऽप्यर्थेऽभिधाव्यापारो दुर्वारः ।

नैयायिकास्तु—प्रसिद्धिप्राचुर्ये सति प्रकरणादिशून्यस्याप्य-

१—'दोषत्वस्यापोदितत्वात्' ख

र्थस्य स्मृतेः, प्रसिद्ध्यभावे प्रकरणादिमतोऽप्यस्मृतेश्च, प्रकरणादिकं नाभिधानियामकम् । शक्तिग्रहसंस्कारपाटवमात्रनियम्यत्वात्तस्याः । किन्तु लिङ्गविधया तात्पर्यग्राहकम् । अत एव 'हरिरस्ति' इत्यनारभ्यवादश्रवणेऽपि हरिशब्दस्यार्थमानिलेन्द्रचन्द्रादयोऽर्था इत्यवधार्यंत एव, वक्तुः क्व तात्पर्यमिति नावधार्यंत इत्याहुः ।

तद्रीत्या न कथंचिदपि प्रकरणाप्रकरणादिनाभिधानियमनं शक्यशङ्कम् । तस्मात् प्रस्तुताप्रस्तुतोभयपरेऽपि प्रस्तुताप्रस्तुतोभयवाच्यार्थेऽभिधैव वृत्तिः । तदुपस्थितेषु च पदार्थेष्वाकांक्षादिसहकारिवशादुभयविधवाक्यार्थप्रत्ययः, इत्यप्रस्तुतविषये न पदार्थप्रतीतये नापि वाक्यार्थप्रतीतये व्यक्तिरुपगन्तव्या । यत्तु [1]प्राचामप्रस्तुते शक्तिमूलव्यञ्जनवृत्त्यभिधानम्, तदप्रस्तुतार्थप्रतीतिमूलके, यथा 'उदयमारूढः—' इत्यादिविशेषणविशिष्टः पृथिवीपतिः स्वल्पैःग्राह्यधनैर्लोकस्य हृदयं रञ्जयति, एवं तथाभूतश्चन्द्रमा मृदुलैः किरणैः, इत्यादिरूपेण प्रतीयमाने उपमाद्यर्थालंकारे तदवश्यंभावदृढीकरणाभिप्रायेण । न तु तत्रापि वस्तुतो व्यञ्जनव्यापारास्तित्वाभिप्रायेण ।

आच्छादितायतदिगम्बरमुच्चकैर्गा—
माक्रम्य च स्थितमुदग्रविशालशृंगम् ।
मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेन—
मुद्वीक्ष्य को भुवि न विस्मयते नगेशम् ।।शि०पा०व० ४·१९

१—'प्राचा प्रस्तुत' क. 'प्राग्वामप्र°' ख. 'प्राञ्चामप्रं°' ग.

इत्यादिना शब्दशक्तिमूलस्यालंकारध्वनेरेवोदाहरणत्वेन तैरपि लिखितत्वात् ।

'उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्' ।

इति श्लेषापादितविशेषणसाधारण्यनिमित्तसमासोक्त्यलंकारोदाहरणे [1]रागादिशब्दानामप्रस्तुतेऽप्यभिधावृत्तेरेव श्लेषव्यवहारेण स्फुटीकरणाच्च ।

नचात्र स्वतोऽप्रस्तुतयोरपि कामिनोः प्रस्तुतशशिनिशावच्छे[2]दकत्वेनान्वयान्न तत्र तयोः सर्वथैव प्रकरणासम्भवः—इति वाच्यम्, 'विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति लक्षणानुरोधेनाप्रस्तुतप्रतिपत्तेर्विशेषणसाम्याधीनत्वेनाप्रस्तुतस्य प्रकरणसम्बन्धावगमात्प्रागेव तद्विशेषणेष्वभिधाया वाच्यत्वात् । प्रस्तुतोपमानत्वादिना यथाकथञ्चिद्भाविप्रकरणसंबन्धस्येहापि सद्भावाच्च । सर्वथाऽप्रस्तुतासम्बन्धस्याप्रस्तुतस्य क्वापि कविविवक्ष्यमाणगोचरत्वाभावात् ।

नन्वेवं शब्दशक्तिमूलस्यालंकारध्वनेः 'आच्छादितायतदिगम्बरम्' इत्याद्युदाहरणसत्त्वेऽपि तन्मूलो वस्तुध्वनिर्लुप्येत, निरलंकारेऽप्रस्तुतार्थ एव वस्तुध्वनेरुदाहरणीयत्वात्, तत्र च त्वयाभिधाङ्गीकारात्—इति चेत्, न । यत्राप्रस्तुतेऽर्थेऽभिधयैव प्रतिपाद्यमाने तन्मूलमनभिधेयं वस्तु प्रतीयते तत्र तदङ्गीकारात् इति ।

१—'रोगेण' क. ख. ग.

२—'च्छेदकत्वेनानन्वयात्तत्र' क.

यथा—

'शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।'

इति । अत्र हि 'अशनि' शब्देन प्रस्तुताद्वज्रादन्यस्मिन्समभिव्याहृत-'शनिविरुद्धरूपे'ऽप्यर्थेऽभिधयैव प्रतिपाद्यमाने 'विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुतः' इत्युपश्लोक्य [1]प्रभावातिशयः प्रतीयते । इत्थमेव प्राचीनैरपि शब्दशक्तिमूलो वस्तुध्वनि-रुदाहृतः ।

ननु—

'भ्रममरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥''

इत्यत्र 'विष'पदेनाप्रस्तुतं गरलं व्यंग्यं वाच्यस्य 'जलद एव भुजगः' इति रूपकस्य सिद्धिकृदिति वाच्यसिद्ध्यङ्गं गुणीभूत-व्यङ्ग्यमुदाहरता मम्मटाचार्येणाप्रस्तुते शक्येऽपि शब्दशक्तिमूलो वस्तुध्वनिरुक्तः । सत्यम्,[2] अप्रस्तुतार्थप्रतीतिमूलतया प्रतीय-मानयोर्वस्त्वलंकारयो व्यंक्त्यवश्यंभावदाढर्यायाश्रितम् 'अप्रस्तु-तार्थेऽपि व्यक्तिः' इति प्रौढिवादमात्रमवलम्ब्य तत्प्रवृत्तमिति नात्राभिनिवेशः कार्यः ।

ननु—[3] एवं प्रस्तुतार्थपर्यालोचनालभ्ययोरेव वस्त्वलंकारयो-र्व्यक्त्युपगमे तत्रार्थशक्तिमूलैव व्यक्तिर्भवेत् इति पृथगर्थशक्ति-

१—'प्रकृतभावा°' ख., 'प्रस्तुतभावां°' ग.
२—'तत्सत्यम्' ग.
३—'एवमप्रस्तुत°' ग.

मूलध्वनेः शब्दशक्तिमूलो[1] न स्यात्—इति चेत्, मैवम् । तथात्वेऽपि प्रस्तुताप्रस्तुतोभयसाधारणशब्दसापेक्षतया प्रस्तुतमात्रा[2]परपर्यायशब्दान्तरपरिवृत्त्यसहिष्णुत्त्वेन ततस्तस्य पृथग्व्यवस्थितेः । एवमन्येऽप्यप्रस्तुतशक्ये व्यक्त्यनुपगमे संभाविताः क्षुद्रोपद्रवाः निरसनीयाः ।

[3]इत्यप्पयदीक्षितविरचिते वृत्तिवार्तिके मुख्यवृत्तिनिर्णयोनाम प्रथमः परिच्छेदः ।

अथ लक्षणा निर्णीयते ।

सा च मुख्यार्थसम्बन्धेन शब्दस्य प्रतिपादकत्वम् । तत्सादृश्येन प्रतिपादकत्वरूपा गौण्यपि लक्षणाप्रभेद एव, तत्सदृशेऽपि तन्निरूपितसादृश्याधिकरणत्वपरम्परासंबन्धसत्त्वात् । न हि 'साक्षात्संबन्धे विशिष्टबुद्धियोग्यसम्बन्धे वा सत्येव लक्षणा' इति नियमः, चक्षुरादेर्घटनैल्यादिषु संयुक्तसमवायादिवद्विशिष्टबुद्धियोग्यस्य परम्परासम्बन्धस्यापि प्रत्यासत्तित्वोपपत्तेः, व्यतिरेकलक्षणास्थले तन्निरूपितविरोधाधिकरणत्वादिपरम्परासम्बन्धमात्रेण तादृशेन लक्षणा क्लृप्तेश्च । एतेन—सादृश्यं न सम्बन्ध इति गौणी लक्षणातो भिन्ना, विशिष्टधीयोग्यस्यैव सम्बन्धत्वात् । संयोगे सति 'दण्डी देवदत्त' इतिवत्सत्यपि सादृश्ये 'सिंहवान्

१—शब्दमूलो ख. ग.

२—'मात्रपर' ख.

३—इति वृत्ति' ख., ग.

देवदत्तः' इति विशिष्ट बुद्धेरदर्शनात् इति निरस्तम्, विशिष्ट-बुद्धिनियामकपरम्परासम्बन्धमात्रस्य प्रत्यासत्तित्वोपपत्तेस्तावता लक्षणाक्लृप्तेश्च दर्शितत्वात् ।

तस्मात् सादृश्यगर्भतदन्यसम्बन्धनिमित्ततया गौणी शुद्धा चेति लक्षणाया एव द्वैविध्यम् ।

इयं च द्विविधापि लक्षणा प्रत्येकं द्विविधा—निरूढलक्षणा फललक्षणा च । रुढितुल्यतया निरूढलक्षणा । विवक्षितार्थान्तर-द्योतनफला फललक्षणा । आद्या (निरूढलक्षणा) यथा—

'लावण्यसागरभुवि प्रणयं विशेषाद्,
दुग्धाम्बुराशिदुहितुस्तव तर्कयामि ।
यत्तां बिभर्षि वपुषा निखिलैः प्रतीकै-
रन्यां तु केवलमधोक्षज वक्षसैव ॥'

अत्र 'लावण्य' शब्दस्य लवणत्ववाचिनो हृदयंगमत्वसादृश्यात्सुषमा-विशेषे रूढिलक्षणा । एवमालेख्यगजादौ गजादिशब्दस्यापि रूढिलक्षणानुसन्धेया । इदं गौण्या उदाहरणम् । शुद्धा यथा—

'क्वणद् द्विरेफावलिनीलकङ्कणम्,
प्रसार्य शाखाभुजमाम्रवल्लरीम् ।
कृतोपगूढा कलकण्ठकूजितै-
रनामयं पृच्छति दक्षिणानिलम् ॥'

अत्र 'द्विरेफ' शब्दस्य 'द्वौ रेफौ यस्य' इति व्युत्पत्त्या भ्रमर-शब्दवृत्तेस्तद्वाच्ये रूढिलक्षणा। एवं त्वगादिशब्दानां त्वगिन्द्रियादिष्वपि शुद्धा लक्षणा द्रष्टव्या।

[[१]फललक्षणा [२]तावत्—] जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा। सारोपा साध्यवसाना च। शुद्धा गौणी च। इत्येवं सप्तविधा फलक्षणा।

जहल्लक्षणा यथा—

'त्वत्पादपद्मसुषमानुकृतिक्षमाणि,
प्राप्तुं प्रवालपदभाञ्जिविभूषणानि।
वल्कावृता धृतजटाः सुरदीर्घिकायां,
कल्पद्रुमाः कति गिरीश तपश्चरन्ति॥'

अत्र 'सुरदीर्घिका'पदस्य कल्पद्रुमाधिकरणत्वयोग्ये तत्तीरे लक्षणा, मुख्यार्थस्य तदधिकरणत्वेनान्वयाभावाज्जहल्लक्षणा। कल्पद्रुमाणां तपश्चर्योत्प्रेक्षोपस्कारकं तीरस्यातिशयितपावनत्वद्योतनं फलम्।

एवं 'गङ्गायां घोषः' इति प्रसिद्धोदाहरणप्यनुसन्धेयम्। तत्र गोस्वामिनः प्रीतये तीरस्याधिकशैत्यद्योतनं फलम्।

व्यतिरेकलक्षणापि जहल्लक्षणा प्रभेद एव। यथा—

१—'तत्राद्या त्रिविधा—शुद्धैव सारोपा साध्यवसाना च। फललक्षणा यथा'—क.

२—'यथा नास्ति' ग. घ.

'उपकृतं बहु तत्र किमुच्यते सुजनताप्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम्॥'

अत्रापकारिण्यन्वयायोग्ये 'उपकृता'दिपदैः स्वार्थविरुद्धं लक्ष्यते। त्वयाऽपकारे क्रियमाणेऽपि मयैवं प्रियमेवोच्यते' इति स्वसाधुत्वद्योतनं फलम्।[1]

अजहल्लक्षणा यथा—'कुन्ताः प्रविशन्ति, यष्टयश्च' इति। **अत्र**[2] 'कुन्ता'दिपदस्य तद्वत्सु पुरुषेषु लक्षणा। कुन्तादेरपि पुरुष-साहित्येन प्रवेशक्रियान्वयादहजहल्लक्षणा। तेषां निर्दयप्रहर्तृत्वादि-द्योतनं फलम्।

ग्रामैकदेशदाहादौ सति 'ग्रामो दग्धः', 'पुष्पितं वनम्' इत्यादि प्रयोगे 'ग्रामा'दि पदस्य स्वार्थैकदेशपरित्यागेन तदेकदेशे वृत्तेर्जहदजहल्लक्षणा, दग्धभूयस्त्वादिद्योतनं फलम्।

सारोपा यथा—

नाथ त्वदीयमकलङ्कमिमं मुखेन्दु—
मापीय तृप्यति सदा वसुधा यतस्ते।
तेनैव किं नव[3]सुधारसगोचरोऽभू—
दिन्दुः कलङ्कमलिनीकृतमध्यभागः॥

१—अत्र 'उपकर्त्तुरुदारप्रकृतित्वादपकर्त्तरि सपदि विपदौचित्यं व्यंग्यम्।' इति साहित्य चूड़ामणिकारः। साहित्यचूड़ामणि पृ० ६७ अनन्तशयनं ग्रन्थावलि १६२६

२—'अत्र भीतिपलायनवाक्ये कुन्ता' ख., ग.

३—'तव' क

अत्र 'इन्दु'शब्दस्य मुखे लावण्यादिसादृश्याद्गौणसारोपा-लक्षणा। ताद्रूप्यप्रतीतिः फलम्। एवं 'गौर्वाहीकः', 'मुखं कमलम्' इत्यादिव्यासेऽपि गौणसारोपलक्षणा द्रष्टव्या।

गौण साध्यवसानलक्षणा यथा-

नाभेरभूत्तव चतुर्भुज नान्तरिक्षं,
यन्नाभिरेव यदुनेतरियं ततोऽभूत्।
अन्योऽन्यसंश्रयपराहतिदूषितं य--
दाह श्रुतिस्तदविमृश्य किमर्थत्वम्॥

अत्रान्तरिक्षपदस्य भगवदवलग्ने सूक्ष्मत्वसादृश्याद्गौण-साध्यवसानलक्षणा। सर्वथैवाभेदप्रतिपत्तिः फलम्। विषयस्य[1] विषयिभेदेनान[2]पह्नुतेन तद्रूपोपरक्तताप्रतीतिस्ताद्रूप्यप्रतिपत्तिः, विषयस्य विषयिणैवाभेदप्रतीतिः सर्वथैवाभेदप्रतिपत्तिः, इति सारोपसाध्यवसायलक्षणाफलयोर्भेदः। विषयविषयिवाचकयोर्द्वयोरपि निर्देशे आरोपः, विषयिपदमात्रस्य विषयलाक्षणिकतया निर्देशोऽध्यवसायः इत्यारोपाध्यवसाययोर्भेदः।

ननु सारोपलक्षणोदाहरणे 'मुखेन्दुः' इत्यादौ 'इन्द्वादि'पदस्य मुखादौ न मुखत्वादिना लक्षणा, 'मुख'पदस्यापि सत्त्वेन पौनरु-क्त्यापत्तेः। नापीन्दुगतलावण्यादिगुणेन, अन्यगुणस्यान्यत्र प्रवृत्ति-निमित्तत्वायोगात्। नापि मुखगतलावण्यादिगुणेन, मुख्यार्थसम्बन्ध-

१—'विषयस्य' न, ख. ग.
२—'°पह्नवेन' ख. ग.

रहितगुणमुखेन लक्षणायोगात् । मैवम् । मुखचन्द्रोभयानुगत-लावण्यसामान्यादिमुखेन लक्षणोपगमे दोषद्वयस्याप्यसंस्पर्शात् । इदमेवाभिसन्धायोक्तं वृद्धैः 'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता' इति ।

शुद्धसारोपलक्षणा यथा—

आपादमाचिकुरभारमशेषमङ्ग-
मानन्दसारमरविन्ददृशामसीमम् ।
अन्तर्मम स्फुरतु संततमन्तरात्म-
न्नम्भोजलोचन तव श्रितहस्तिशैलम् ।

अत्र भगवदङ्गेष्वानन्दकारित्वेन 'आनन्द'पदस्य सारोप-लक्षणा । आनन्दकरणे इतरवैलक्षण्यद्योतनं फलम् । आनन्दकारिणि विषयनिगरणेन 'आनन्दोऽयम्' इति प्रयोगे साध्यवसायलक्षणा । [1]आनन्दाव्यभिचारद्योतनं फलम् । एवं शुद्धा पञ्चविधा, गौणी द्विविधा, इति सप्तविधा फललक्षणा ।

ननु गौण्यामपि जहदजहल्लक्षणाभेदौ संभवतः, 'मुखं कमलम्' गौर्वाहीकः' इत्यादौ जहल्लक्षणा तावत्स्फुटैव । अजहल्ल-क्षणापि गोवाहीकोभयविषये 'गाव एते समानीयन्ताम्' इत्यादौ दृश्यते । अतः कथं द्विविधैव गौणी ? उच्यते—मुख्यार्थसादृश्येन लक्षणा गौणी । न च तत्रैव तत्सादृश्यमस्ति, येन मुखेऽपि गौणी-

१—'आनन्दव्यभि°' घ.

वृत्तिः स्यात् । शुद्धात्वजहल्लक्षणा—'कुन्ताः प्रविशन्ति' इत्यादौ विशेषणवाचिनो विशिष्टे संभवति, विशिष्टविशेषणयोरेकदेश्येकदेशभावरूपसम्बन्धसत्त्वात् । अतो 'गाव एते समानीयन्ताम्' इत्यादावभिधालक्षणाभ्यामेवार्थद्वयप्रतिपादनम्, 'गङ्गायां जलं घोषश्च तिष्ठति' इत्यत्रेवेति[1] न गौण्या जहदजहल्लक्षणाभेदसंभवः, तस्मात्सप्तैव लक्षणाभेदा इति । इत्थमयं चिरन्तनैः प्रदर्शितो लक्षणाविभाग इति ।

अत्रेदं प्रतिभाति—'शुद्धासु साध्यवसायलक्षणाभेद[2]कथनमयुक्तम्, परार्थं स्वसमर्पणस्याविशेषेण तस्य जहल्लक्षणानतिरेकात् । न हि तदविशेषेऽपि सारोपलक्षणायां विषयवाचकसामानाधिकरण्यकृतवैचित्र्यान्तरमस्ति, येन तद्वदेव जहल्लक्षणातः पृथगुदाह्रियेत ।

ननु-'कार्यकारणभाव[3]सम्बन्धेन वृत्तिः इत्यत एव पृथक्त्वमस्तु, कार्यकारणभावातिरिक्तेन गङ्गातीरादिगतसंयोगादिसंबन्धेन वृत्तौ जहल्लक्षणा' इत्यसंकरोपपत्तेः । मैवम् । 'राजकीयः पुरुषो राजा, इन्द्रार्थास्थूणा इन्द्रः, अतक्षायं तक्षा, अग्रहस्तोऽयं हस्तः' इति स्वस्वामिभावतादर्थ्यतात्कर्म्यावयवावयविभावेष्वपि कार्यकारणभाव इव सारोपाध्यवसायलक्षणयोराकरग्रन्थेषूदाहरणादाश्रयाश्रयिभावसम्बन्धेऽप्यलंकारसुधानिधावुदाहरणाच्च वैचित्र्यान्तराभावेऽपि सम्बन्धभेदमात्रेण विधान्तरोपगमे सम्बन्धभेदान्तर-

१—'इत्यत्रान्वेति' ख. ग.
२—'प्रभेद' ख. ग.
३—'सम्बन्धे' क.

मवलम्ब्यापि विधान्तरोपवर्णनस्य[1] प्रत्याख्यातुमशक्यतया सप्तविधत्वनियमासामंजस्यप्रसङ्गाच्च ।

ननु साध्यवसायलक्षणोदाहरणेष्वभेदाभिव्यक्तिरस्ति, 'अयमानन्दः, अयं राजा' इत्यादावानन्दराजाद्यभेदाभिव्यक्तिपूर्वकमेवानन्दाव्यभिचारित्वानुल्लंध्यशासनत्वादिफलप्रतीतेः, अतो व्यंग्यवैचित्र्येण भेदोऽस्तु इति चेत्, न । जहल्लक्षणोदाहरणेऽपि तीरे प्रवाहाभेदाभिव्यक्तिपूर्वकमेव तत्र तद्गतातिशयितशैत्यपावनत्वादिफलप्रतीतेः । तीरे प्रवाहतादात्म्यप्रतीत्यभावे तत्र प्रवाहगतातिशयितशैत्यादेः[2] प्रत्ययासंभवात् । नहि तीरे गंगासम्बन्धप्रयुक्तं तद्गतस्वाभाविकशैत्यादिद्योतनमेव लक्षणाफलम्, येन गंगादिसम्बन्धितीरत्वेन लक्षणैव तल्लभ्यते इति नाभेदाभिव्यक्तिरङ्गीक्रियते, सत्यपि मुख्ये गङ्गातीरादिपदे स्वायत्ते च शब्दप्रयोगे मुख्यप्रयोगादपि लभ्यस्य लक्षणाफलत्वायोगात् । काव्यसरणौ—'लक्षणायां काव्यशोभातिशयाधायकतयाप्यधिकं स्तोतुकामस्तस्य प्रवाहतादात्म्यप्रतिपत्त्या तद्गतातिशयितपावनत्वद्योतनाय तस्मिन् गङ्गापदं प्रयुङ्क्ते' इति दर्शनाच्च । अतो जहल्लक्षणायामप्यभेदाभिव्यक्तिरविशिष्टा । उक्तं च काव्यप्रकाशिकायाम्—'तटादीनां गङ्गादिशब्दप्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः'[3] इति । रत्नाकरेणाप्युक्तम्—'स्रोतस्तीरयोरेक-

---

१—'वर्णनस्यापि' ख. ग.

२—'शैत्यपावनत्वादेः प्र° ख. शैत्यपावनत्वप्रत्य°' ग.

३—काव्यप्रकाश पृ० ४६, पूना संस्करण

शब्दबोध्यत्वेन तादात्म्यप्रतीतेः स्रोतोधर्माः शैत्यपावनत्वादयस्तीरे प्रतीयन्ते इति प्रयोजनसिद्धिः' इति । अतः साध्यवसायलक्षणायाः फलकृतोऽन्यकृतो वा न जहल्लक्षणातो भेदः संभवति इति न तदुदाहरण-पार्थक्यं युक्तम्[४] । तथा सारोपलक्षणोदाहरणे उपमानोपमेयानुगतसाधारणधर्ममुखेन लक्षणा इत्ययुक्तम् । तथासति यत्र साधारणधर्मस्यापि पदान्तरेणोपादानं तत्र पौनरुक्त्यापत्तेः । यथा—

'ताराभिरामपरिणाहलसत्सिताभ्रं,
तापिच्छमेचकमुरः शरदन्तरिक्षम् ।
प्राप्यैव देव तव कौस्तुभपूर्णचन्द्रः,
पूर्णां बिभर्त्ति पुरुषोत्तमकान्तिरेखाम् ॥'

अत्र हि वक्षोन्तरिक्षयोः साधारणः परिणाहित्वमेचकत्वादिधर्मोऽपि पृथगुपात्त एव । 'उपात्तधर्मातिरिक्तधर्ममुखेन लक्षणास्तु' इति चेत् न । उपात्तमेचकत्वादिव्यतिरिक्तसामान्यधर्मास्फुरणेऽपि सहृदयानां परिपूर्णवाक्यार्थप्रतीतिदर्शनाद् द्रव्यत्वादिसामान्यधर्मस्य कवितानङ्गत्वात् । अन्ततः कवयितुरप्येतादृशस्थलेषूपात्तधर्मातिरिक्तधर्मगर्भीकाराभावाच्च ।

ननु इह मा भूत्सारोपलक्षणा । 'उर एव शरदन्तरिक्षम्' इति मयूरव्यंसकादिसमासोपगमे हि सा भवति । किन्तु 'उरः शरदन्तरिक्षमिव' इत्युपमितसमासोऽस्तु । तत्र च विग्रहवाक्यस्थो लुप्त-

४—'पार्थक्ययुक्तम्' ख. ग.

इवकारः सादृश्यं प्रतिपादयतीति 'नोपमानवाचकस्योपमेये लक्षणा' इत्यालंकारिकाणामभ्युपगमः । तत्र तैर्लुप्तोपमाङ्गीकारात्; इति न कश्चिद् दोषः इति चेत्, न । मेचकत्वादिसामान्यस्य शब्दोपात्ततयोपमितसमासासंभवात् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे[1]' इति सामान्याप्रयोगे एव तत्समासानुशासनात् । आलंकारिकैरपि—'सामान्यप्रयोगे सत्युपमा[2]बाधकसत्वात्सारोपलक्षणामूलको रूपकालंकारः । न तूपमालङ्कारः' इत्यभ्युपगमात् । उपमित समासे [3]धर्मवाचकलुप्तोपमालंकारस्यैव तैरुदाहरणाच्च । सामान्यधर्मप्रयोगेऽप्युपमितसमासाङ्गीकारे हि केवलवाचकलुप्तापि तत्रोदाह्रियेत ।

नन्वेवं साधारणधर्मप्रयोगे सादृश्यमुखेन लक्षणाऽस्तु, तद्वाचकस्य यथा इव वाऽऽदेरप्रयोगेण पौनरुक्त्याप्रसङ्गात् । तत्[4] प्रयोगे उपमानवाचकस्य सादृश्यप्रतियोगिभूतस्ववाच्यपरतयोपमेयलक्षणाया अवाच्यत्वात् इति चेत्, न । तथा सति [5]सादृश्यस्य शब्दोपात्तत्वेनोपमालंकारस्य प्राप्त्या 'सारोपलक्षणायां रूपकादिरलंकारः, नोपमा' इत्यलंकारविभागासामञ्जस्यप्रसङ्गात् । न हि [6]सादृश्यस्य वाच्यत्व एवोपमा, 'कमलसुहृन्मुखम्' इत्यादौ 'सुहृ-

---

१—पाणिनि २-१-५६ २—'वाचकासत्वा°' ख. ग.

३-—'सामान्यधर्म°' क. ४—'तत्तत्प्रयोगे' ख. ग.

५—'सादृश्यश°' क ६—'सादृश्यवाच्यत्व°' क

दादि'पदेन लक्षणायामप्युपमासम्प्रतिपत्तेः। अपि च 'पादाम्बुजम्' इत्यादौ व्याघ्रादेः समासेनोपमायाः मयूरव्यंसकादिसमासेन रूपकस्य च संभवेन सर्वत्रानवधारणे प्राप्ते यत्र--

'पादाम्बुजं भवतु वो विजयाय मञ्जु,
मञ्जीर शिञ्जितमनोहरमम्बिकायाः ॥'

इत्यादौ पादे संभवन्मञ्जीरयोगादिकं निबध्यते, तत्र तदानुगुण्यात् पूर्वपदार्थप्रधानेन व्याघ्रादिसमासेनोपमालंकारः, यत्र तु—

'यस्यानिशं दिविषदश्चरणारविन्द—
मुत्तंसयन्त्यमितभक्तिभरावनम्राः ॥'

इत्यादावरविन्दकार्यमुत्तंसनादिकं निबध्यते, तत्र तदानुगुण्यादुत्तरपदार्थप्रधानेन मयूरव्यंसकादिसमासेन रूपकालंकारः, इति व्यवस्था सर्वैरपि प्रतिपाद्यते। न च इयं व्यवस्था 'चरणारविन्दमि'त्यादिरूपकस्थलेषु 'अरविन्दादि'पदानामरविन्दत्वाद्याकारमपहायारुणिमादिसाधारणधर्ममुखेन तन्निबन्धनसादृश्यमुखेन वा चरणादिलक्षकत्वे युज्यते। तथा सत्युत्तरपदार्थस्यारुण्य[1]सादृश्यगुणस्य[2]प्राधान्यादियोगेन मयूरव्यंसकादिसमासाश्रयणेऽपि व्याघ्रादिसमासाश्रयण इव पूर्वपदार्थचरणस्यैव प्राधान्यापत्त्योत्तंसनानुगुण्यस्य[3] विरहतौल्यापत्तेः। गुणजात्योर्जातिप्राधान्यस्य

१—'सादृश्यादिगुणस्य' ख. ग.

२—'प्राधान्यायोगेन' ख. ग.

३—'°नुगुणस्य' क

नीलोत्पलादौ व्यवस्थितेः । उत्तरपदार्थस्य प्राधान्येऽप्यरविन्द-जातेरिवारुण्यसादृश्यादिगुणस्योत्तंसनानुगुणत्वाभावाच्च । तस्मात् 'सारोपलक्षणोदाहरणेषु साधारणधर्मादिमुखेन लक्षणा—' इत्ययुक्तम् । तथा—'ताद्रूप्यप्रतीतिरत्र फलम्' इत्यप्ययुक्तम् । सामान्यधर्ममुखेन सादृश्यमुखेन वा लक्षणोपगमे ताद्रूप्याभिव्यक्त्ययोगात्, तथाहि—'कान्तिमन्मुखम्', 'चन्द्रसदृशं मुखम्' इत्यादिरर्थः संपद्यते । न चैतावता ताद्रूप्याभिव्यक्तिः, 'कान्तिमन्मुखम्' इत्यादि प्रयोगेऽपि तत्प्रसङ्गात् । न च 'गङ्गायां घोषः' इत्यादौ स्रोतस्तीरयोरभेदाध्यवसायवन्मुखचन्द्रयोरेकशब्दबोध्यतया केवल शब्दशक्तिमूलव्यञ्जनव्यापारेण ताद्रूप्याध्यवसाय इति नातिप्रसङ्गः इति वाच्यम्, तदा मुखकान्तिमतोरेव तद्रूप्याभिव्यक्तेः संभवेन 'वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते' इत्यादावानुभाविकस्य मुखत्वोपरक्तचन्द्रताद्रूप्यप्रत्ययस्याक्लिष्टसमर्थना संभवात् । तथा 'मुखं कमलम्' इत्यादिव्यासेऽपि सर्वत्र विषयविषयिपदयोः सामानाधिकरण्ये सारोपलक्षणा इत्यप्ययुक्तम् ।

विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते,
दुर्गामार्गणनीललोहितसमित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो,
साम्राज्यं वरवीरवत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥

इत्यत्र 'हंसादि शब्दानां वर्ण्ये राजनि प्रत्यासत्तिरूपमुख्य[1]सादृश्य-

[1]—'सादृश्यपतीत्या' ख. ग.

प्रतीत्या लक्षणासंभवात् । तथा हि—विदुषां मानसं हृदय-मेव मानसं सर इत्यादि श्लेषभित्तिकाभेदाध्यवसायलभ्यमानस-वासित्वादिसाधारणधर्मनिबन्धनमेव तत्र सादृश्यं वाच्यम् । तदन्य-मुखकमलादिवत्प्रसिद्धसादृश्यस्याभावात् । न च तेन सादृश्येन लक्षणा संभवति, तल्लम्भकस्य श्लेषस्य रूपकोत्थाप्यतया रूपका-पेक्षलक्षणादशायां तस्य बुद्धिपथानारोहात् । न च श्लेषस्यैव प्राधान्यं किं न स्यात् इति वाच्यम्; रूपकं विना कवेरर्थद्वयविव-क्षायामिह गमकाभावेन श्लेषानिवृत्तेः । अभिधायाः प्रकरणनिय-म्यत्वपक्षे प्राचीनाभिमते रूपकात्प्राक् प्रकरणसम्बन्धरहित सारोपलक्षणार्थान्तराभिधानस्येवासंभवात् ।

रूपकं पूर्वसंसिद्धं श्लेषं [१]तज्ज्ञापयेद्यदि ।

तदारूपकमेव स्यादन्यथा श्लेष इष्यते । अ०स०नि०का० २१

इति श्लेषरूपकयोर्विभागं व्यवस्थापितवता चक्रवर्त्तिनाप्य-स्मिन्नुदाहरणे रूपकोपवर्णनेनात्र श्लेषपाश्चात्त्यत्वस्यास्फुटी-करणाच्च इति । अत्रेदं तत्त्वं—'विद्वन्मानसहंस—' इत्यादौ 'हंसादि' पदानां वर्ण्ये राजनि लक्षणा नाङ्गीकर्तव्या, सामानाधि-करण्येन वर्ण्यस्य राज्ञः प्रसिद्धहंसजातीयादिभिरभेदस्य वाक्यार्थ-[२]विधयैव प्रतीत्युपपत्तेः । न च एवमभेदप्रत्ययसंभवेऽपि ताद्रूप्य-प्रत्ययो न लक्षणां विना सिध्येत् । स एव च विषयविषयिपद सामानाधिकरण्यस्थले सर्वत्र विवक्षित इति वाच्यम्, तत्र माना-

१—'उत्थापयेद्यदि' अलंकारसर्वस्वनिष्कृष्टार्थकारिका २१
२ - 'विरोधयैव' क.

भावात् । 'ऊर्ध्वं विरश्चिभवनात्तव नाभिपद्मात्' इत्यादौ विषय-विषयिपदसामानाधिकरण्येऽप्येवकारसाक्षात्पदाभ्यामुरःस्थले प्रसिद्ध-पद्मपदाभेदविवक्षाया एव स्फुटीकरणाच्च । न च एवं 'विद्व-न्मानसहंस' इत्यादावतिशयोक्तिरेव स्यात् 'विषयस्य विषयिताद्रूप्ये रूपकम्, विषय्यभेदेऽतिशयोक्तिः' इति व्यवस्थितेः । तथा च 'विषयविषयिसामानाधिकरण्यस्थले रूपकं, विषय्यभेदमात्रनिर्देश-स्थलेऽतिशयोक्तिः' इति व्यवस्थाविभाग इति वाच्यम् ।

हृत्पङ्कजानि भजतां प्रतिबोधयन्ती,
संसारसागरमपि प्रविशोषयन्ती ।
ज्योत्स्नात्वदंघ्रिनखचन्द्रसमुद्गतेय-
मन्यादृशीमभयदां प्रकृतिं बिभर्ति ॥

इत्यत्र नखकान्तिरूपविषयनिगरणेन 'ज्योत्स्ना' इति विषयि-पदमात्रनिर्देशेऽपि पङ्कजविकासकत्वादिना प्रसिद्धज्योत्स्नातो व्यतिरेकेण तत्ताद्रूप्यमात्रप्रतीतेर्दर्शनेन व्यवस्थाद्वयस्याप्यशक्या-ङ्गीकारत्वात् । तथा च यदि 'ताद्रूप्ये रूपकम्, अभेदेऽतिशयोक्तिः' इति व्यवस्थां परित्यज्य 'विषयविषयिपदसामानाधिकरण्ये रूपकम्, विषयिपदमात्रनिर्देशेऽतिशयोक्तिः' इति व्यवस्थाद्रियते, तदा 'विद्वन्मानसहंस' इत्यादावभेदप्रतीतौ सत्यामपि रूपकं संभ-वतीति न काचिदनुपपत्तिः । यदि च तथा सति रूपकातिशयो-क्त्योः शब्दवैचित्र्यमात्रभेदप्राप्त्या परस्परमर्थालंकाररूपत्वं न

स्यादित्याद्या व्यवस्थाद्रियते, तदा 'ज्योत्स्ना त्वदंघ्रिनख-' इत्यादौ विषयिपदमात्रनिर्देशेऽपि प्राचीनमर्यादायामतिशयोक्तिमपहाय रूपकमेवाङ्गीकर्तव्यम् । तद्वत् 'विद्वन्मानसहंस' इत्यादौ विषयविषयिपदसामानाधिकरण्येऽप्यतिशयोक्तिरङ्गीक्रियताम् । किमनुपपन्नम् । तस्मात् एतादृशस्थले समभिव्याहारादभेदप्रतीत्युपगमे न कश्चिद्दोष इति व्यर्थो लक्षणोपपादनप्रयासः । न च एवं सर्वत्र विषयविषयिसामानाधिकरण्यस्थले समभिव्यहारादभेदप्रतीतेर्वक्तुं शक्यत्वात्क्वचिदपि सारोपलक्षणा न स्यात्—इति वाच्यम्, इष्टापत्तेः ।

इति श्री अप्पयदीक्षितविरचिते वृत्तिवार्त्तिके लक्षणा वृत्तिनिर्णयोनाम[1]


द्वितीयः परिच्छेदः ।

समाप्तश्चायमुपलभ्यमानो ग्रन्थः ।

१—इति वृतिवार्त्तिके ख ग



Mahamahopadhyaya Pt. Gopinatha Kaviraja



त्रीणि कारणानि आवश्यकानि न वा ?

एन० एस० रामानुजताताचार्यः, तिरुपति

तर्कसंग्रह–दीपिका-कारिकावली–मुक्तावलीप्रभृतिषु न्यायवैशेषिकानुसारिषु प्रकरणग्रन्थेषु समवायिकारणं असमवायिकारणं निमित्तकारणं चेति कारणं त्रेधा विभज्य तस्य प्रत्येकं लक्षणमपि परिष्कृत्य प्रतिपादितमस्तीत्ययं विषयः मन्ये प्रायः सर्वेषां संस्कृतविदुषां विदितचर इति । अत्र केचन आधुनिकविमर्शकाः इत्थं कारणस्य त्रेधा विभागः न सूत्रादिषु प्राचीनेषु ग्रन्थेषु उल्लिखितः केवलं नव्यनैयायिकैः सविजृम्भणं प्रतिपादित इति मन्यन्ते । एतत्तत्त्वपरिशीलनाय अयं लेखः ।

कारणत्रयस्य वैशेषिकदर्शनसंमतत्वम्

वैशेषिकसूत्रेष्वेव कारणत्रयप्रस्तावो विद्यत इति प्रथमं निरूपयामः । दशमेऽध्याये द्वितीयाह्निके आदिमानि सप्त सूत्राणि विमृशेम । तत्र प्रथमं सूत्रम्—

'कारणमिति द्रव्ये कार्यसमवायात्'

इति । इदं सूत्रं उपस्कारे इत्थं व्याख्यातम्—

कारणम्—समवायिकारणमिदमिति प्रतीतिप्रयोगौ द्रव्ये द्रष्टव्यौ । कुत एवम् ? अत आह—कार्यसमवायात् । कार्याणि द्रव्यगुणकर्माणि तत्रैव समवयन्ति यत इति ।

पटादिरूपं द्रव्यं तन्त्वादिद्रव्ये समवायसंबन्धेन वर्तते । शुक्लादिगुणः पटादिद्रव्ये समवायेन विद्यते । उत्क्षेपणादिरूपा क्रिया हस्तादिद्रव्ये समवायसंबन्धेनास्ति । एवं च कार्याणां द्रव्यगुणकर्मणां समवायसंबन्धेन द्रव्ये वर्तमानत्वात् द्रव्यं समवायिकारणमिति सूत्रार्थः । यद्यपि सूत्रे कारणमिति सामान्यत उक्तम्, तथापि 'कार्यसमवायात्' इति हेतुमहिम्ना कारणपदेन समवायिकारणमेव विवक्षितमिति निश्चीयते । न हि समवायिकारणादन्यस्मिन् कारणे कार्यसमवायोऽस्ति । तथा चानेन सूत्रेण समवायिकारणं कणादस्य संमतमित्युन्नीयते । अस्य सूत्रस्य न कोऽप्यन्योऽर्थः

संभवति । कारणपदं हि यदि कारणसामान्यपरं स्यात्, तदा द्रव्यं, कारणमिति प्रतीतिव्यवहारयोर्विषयः, कार्यसमवायात् इत्यर्थः सूत्रस्य वक्तव्यः स्यात् । स चासंगतः । कार्यसमवायरहितेष्वपि गुणक्रियादिषु तन्तुरूपं पटरूपस्य कारणमित्यादिप्रतीते-र्व्यवहारस्य च सत्त्वेन कार्यसमवायस्य कारणमिति प्रतीतिव्यवहाराप्रयोजकत्वात् । अतः समवायिकारणपरत्वमेव सूत्रस्थकारणपदस्य योयुज्यते । कार्यसमवायाश्रयत्वं समवायेन कार्याश्रयत्वं वा समवायिकारणत्वमिति लक्षणमप्यनेन सूत्रेण सूच्यते ।

ततो द्वितीयं सूत्रं—'संयोगाद्वा' इति । न केवलं समवायिकारणत्वमेव द्रव्यस्य, अपि तु निमित्तकारणत्वमपीत्यनेन सूत्रेण प्रतिपाद्यते । पूर्वसूत्रादत्र 'कारणमिति द्रव्ये' इत्यनुवर्तते । अनुवृत्तस्य कारणशब्दस्य पूर्वसूत्रे समवायिकारणपरस्यापि अत्र सूत्रे निमित्तकारणपरत्वम् औचित्यादाश्रीयते । तथा च द्रव्ये निमित्तकारणमिति प्रतीति-व्यवहारौ संयोगात् हेतोर्भवतः इति सूत्रार्थः । 'तुरीतन्तुसंयोगस्यापि पटकारणत्वात् तद् द्वारा तुर्यास्तन्तोश्च पटनिमित्तकारणत्वमपि' इत्युपस्कारः । यद्वा वाशब्दः समुच्च-यार्थकः । पूर्वसूत्रादनुवृत्तस्य कारणपदस्यात्र सूत्रेऽपि समवायिकारणमित्येवार्थः । द्रव्यस्य तन्त्वादेः पटादिकं प्रति यत् समवायिकारणत्वं वर्तते तत् तुरीतन्तुसंयोगाच्च भवति । तुरीतन्तुसंयोगो नास्ति चेत् संयुज्यमानेष्वपि तन्तुषु पटो नोत्पद्येत । तन्तोः पटसमवायिकारणत्वं च न स्यात् । तथा च समवायिकारणासमवायिकारणानुग्राह-कत्वरूपं निमित्तकारणलक्षणमप्यत्र सूत्रे सूचितमिति मन्तव्यम् ।

ततस्तृतीयं सूत्रम्—'कारणे समवायात् कर्माणि' इति । अनेन सूत्रेण कर्मणां कारणत्वं प्रतिपाद्यते । कर्माणि कारणानि । कस्मात् ? कारणे समवायात् । कस्य कारणे इत्याकाङ्क्षायां कार्यस्येति अर्थात्सिद्ध्यति । तथा च या क्रिया यत्कार्यस्य कारणं भवति, सा तत्कार्यकारणे समवेता सती तत्कार्यकारणं भवतीत्यर्थः । यथा हस्तगतक्रियया हस्तपुस्तकसंयोगो जायते । तत्र कार्यं संयोगः तस्य कारणं (समवायि-कारणं) हस्तः, तत्र समवेता सती क्रिया संयोगकारणं भवति । तथा च कार्यसमवायि-कारणे समवेतं सत् यत् कारणं तत् प्रथमसूत्रोक्तसमवायिकारणविलक्षणत्वात् असम-वायिकारणमिति व्यपदिश्यते । अनेन सूत्रेण कार्यैकार्थप्रत्यासत्त्या कारणत्वरूपम् असमवायिकारणत्वं सूचितम् ।


अत्र सूत्रे 'कर्मणि' इति सप्तम्येकवचनान्तपाठः साधीयान् । प्रथमसूत्रे 'द्रव्ये' इति पाठात्, तथा उपरि सूत्रे 'रूपे' इति पाठाच्च । अत्र प्रथमसूत्रात् 'कारणमिति' इति भागोऽनुवर्तते । कर्मणि—क्रियायाम्, कारणमिति प्रतीतिव्यवहारौ कारणे समवायात् भवत इति सूत्रार्थः । तन्तुगतं रूपं हि कार्यभूतस्य पटरूपस्य यत् कारणं पटः तेन सह एकस्मिन्नर्थे तन्तौ समवेतम् । तथा च कारणैकार्थप्रत्यासत्त्या कारणत्वरूपमसमवायिकारणत्वमत्र सूत्रे सूचितम् ।

ननु संयोगजसंयोगवत् कर्मजं कर्म कुतो न भवतीति चेन्न, हस्तपुस्तकसंयोगे सति पुस्तकसंयुक्तः कायः इत्यपि व्यवहारस्य सत्त्वात् तस्य मुख्यत्वोपपत्तये संयोगज-संयोगोऽङ्गीक्रियते । हस्तचलने सति कायश्चलति इति व्यवहारस्य मुख्यत्वं न शक्य-मुपपादयितुम् । हस्तसंयोगादतिरिक्तस्य कायसंयोगस्येव हस्तचलनातिरिक्तस्य कायचलनस्य दुर्वचत्वात् । चलनं हि क्रिया जाता विभागं, पूर्वसंयोगनाशं, संयोगान्तरं च अवश्यं जनयेत् । अन्यथा क्रियात्वस्यैवासंभवात् । न च हस्तचलनजनितविभा-गाद्यपेक्षया व्यतिरिक्तं कायचलनजनितं विभागादिकं किञ्चित्सुवचम् । अतो न संयोगजसंयोगवत् कर्मजं कर्म शक्यमङ्गीकर्तुम् । कायश्चलतीति प्रतीतिः अवयवे अवयविशब्दप्रयोग इति औपचारिक्येव ॥२४॥

२५. द्रव्याणां द्रव्यं कार्यं सामान्यम् ।

द्रव्यगुणकर्मणां कारणभावेन साधारणत्वतदभावौ पञ्चभिः सूत्रैरुक्तौ । अथ इतः प्रभृति तेषामेव कार्यभावेन साधारणत्वमाह । कार्यभावोऽपि अनेककारण-निरूपित इह अभिप्रेतः । कपालद्वयस्य घटरूपमेकं कार्यं समानम् । तन्तूनां बहूनामेकः पटः । तदत्र अनेकद्रव्यविषये द्रव्यरूपमेकं कार्यं समानमित्युक्तम् ॥२५॥

२६. द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाश्च ।

अनेकद्रव्याणाँ एते गुणाः कार्यभावेन समानाः । द्वित्वप्रभृतयः—एकत्व व्यतिरिक्ताः । अनेकघटसत्त्व एव हि द्वित्वादिसंख्या जायन्ते । पृथक्त्वं एकपृथक्त्वप्रभृति

सर्वम् । यतः घटान्तरसत्त्व एव अयं तस्मात् पृथगिति प्रतीतिव्यवहारौ भवतः । एकस्यैव घटस्य समवायिकारणत्वेऽपि स्वतन्त्रान्वयव्यतिरेकशालित्वात् घटान्तरस्यापि कारणत्वं वाच्यमेव । तत्तु निमित्तकारणत्वम् । अथापि अनेकघटकारणकत्वमक्षतम् । न च एकत्वस्येव एकपृथक्त्वस्य स्वभावसिद्धत्वात् न कारणापेक्षेति वाच्यम् । तथा सति घटः शुक्लः एक इति घटान्तरादिवस्त्वन्तरनिरपेक्षप्रतीतिव्यवहारवत् पृथगित्यपि तदापत्तेः । न च सूत्रकारः स्वाभिप्रायं एवं क्वचित्प्रकाशयति । प्रत्युत अस्मिन् सूत्रे संयोगादिभिः सह अविशेषेण पृथक्त्वपाठात् सर्वं पृथक्त्वं तदा तदा उत्पद्यत इति ज्ञापयति ।

संयोगस्य द्रव्यद्वयनिष्ठत्वात् सः अनेकद्रव्यस्य एकं कार्यं समानम् । एवं विभागोऽपि द्रव्यद्वयस्य समानं कार्यम् । संयुक्तयोरेव विभागात् ॥२६॥

(२७) असमवायात् सामान्यकार्यं कर्म न विद्यते ।

अनेकद्रव्यस्य यथा द्रव्यं गुणश्च उक्तरीत्या समानं कार्यं तथा कर्म न भवति । कस्मात् ? कर्मणः एकद्रव्यमात्रवृत्तित्वात् । अनेकद्रव्ये समवायाभावात्, अवर्तमानत्वात् ।

(२८) संयोगानां द्रव्यम् ।

अथानेकस्य गुणस्य सामान्यं कार्यमाह । कार्यं सामान्यमित्यनुवर्तते । संयोगानां तन्तुगतानां बहूनां पटरूपं एकं द्रव्यं समानं कार्यम् ॥२८॥

(२९) रूपाणां रूपम् ।

तन्तुगतानां बहूनां रूपाणां एकं सामान्यं कार्यं पटगतं एकं रूपम् । पूर्वं द्रव्यस्य समानकार्यत्वमुक्तम् । अत्र गुणस्य ॥२९॥

(३०) गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ।

उत्क्षिप्यमाणवस्तुगतं गुरुत्वं, उत्क्षेप्तुः प्रयत्नः, वस्तुनः उत्क्षेप्तृहस्तसंयोगः, इत्येषां गुणानां एकमुत्क्षेपणात्मकं कर्म समानं कार्यम् । अत्र कर्मणः समानकार्यत्वमुच्यते ॥३०॥

(३१) संयोगविभागाश्च कर्मणाम् ।

द्रव्याणां गुणानां च समानं कार्यमुक्तम् । अद्य कर्मणां समानं कार्यमाह । कारणानेकत्वप्रकरणात् कर्मणामित्यनेन संयुज्यमानयोर्वियुज्यमानयोर्वा उभयोः कर्माणि गृह्यन्ते । तेषां संयोगा विभागाश्च समानकार्यभूताः ॥३१॥

(३२) कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ।

ननु "संयोगविभागाश्च कर्मणा"मिति पूर्वसूत्रे कर्मणां संयोगविभागरूप-गुणमात्रं समानं कार्यमुक्तम् । द्रव्याणां यथा द्रव्यं गुणश्चेति द्वयं गुणानां च यथा द्रव्यं गुणः कर्म चेति त्रयं समानं कार्यमुक्तं तथा कर्मणां कुतो नोच्यते इति शङ्का-परिहाराय पूर्वोक्तं स्मारयति—**कारणसामान्य** इति ।

कारणसामान्ये । कारणं सामान्यमिति यत्रोक्तं तत्प्रकरणमिह कारणसामान्य-पदेनाभिधीयते । तत्र "न द्रव्याणां कर्म" इति कर्म द्रव्यकारणं न भवतीत्युक्तम् । "गुणवैधर्म्यान्न कर्मणां कर्म" इति कर्मकारणं न भवतीति च । इत्थं द्रव्यकर्मणी प्रति कर्म न कारणमित्युक्तत्वात् द्रव्यकर्मणी कर्मणः कार्ये न भवत इत्यप्युक्तप्रायम् । तथा च कर्मणां द्रव्यं कर्म वा यस्मान्न कार्यं भवति तस्मात् कर्मणः द्रव्यं कर्म वा किञ्चित् समानं कार्यं भवतीति वचनस्य नास्त्यवसरः । अतो नोच्यत इति भावः ।

अस्मिन् आह्निके द्वात्रिंशत् सूत्राणि । तत्र आद्यानि त्रीणि औपोद्घातिकं धर्म-विषयं एकं प्रकरणं भवन्ति । चतुर्थमेकं शास्त्रस्य विषयप्रयोजननिर्देशपरं द्वितीयं प्रकरणम् । पञ्चमषष्ठसप्तमानि आद्यत्रिपदार्थीविभजनपरं तृतीयम् । अष्टमात्प्रभृति पञ्चविंशतिः सूत्राणि द्रव्यगुणकर्मणां साधर्म्यवैधर्म्यनिरूपणाय प्रवृत्तमेकं महा-प्रकरणम् ।

तत्र अष्टमं त्रयाणां साधर्म्यमाह । नवमदशमे द्रव्यगुणयोः साधर्म्यमाहतुः । इदमनयोः साधर्म्यं कर्मापेक्षया अनयोर्वैधर्म्यमपि भवति । एकादशद्वादशसूत्रे अवयविनो द्रव्यान्तरत्वं समर्थयती पूर्वसूत्रयोः शेषतां गच्छतः । त्रयोदशं सूत्रं कर्मणः सजातीया-नारम्भकत्वेन द्रव्यगुणापेक्षया वैधर्म्यं ब्रूते । एवमियं षट्सूत्री त्रयाणां पदार्थानां नाश्य-नाशकभावेतरधर्मैः साधर्म्यवैधर्म्यकथनतत्परा एकमवान्तरप्रकरणम् ।

चतुर्दशादीनि त्रीणि सूत्राणि नाश्यनाशकभावपुरस्कारेण त्रयाणां साधर्म्य-वैधर्म्ये प्रतिपादयन्ति। सजातीयारम्भकत्वं हि पूर्वं प्रस्तुतम्। तेनोपस्थितं नाशकत्व-मनन्तरं तन्त्रीक्रियते। इदमपरमवान्तरप्रकरणम्।

सप्तदशप्रभृतीनि त्रीणि त्रयाणां पदार्थानां लक्षणकथनपराणि। लक्षणं अति-व्याप्तिरहितत्वेन इतरपदार्थापेक्षया वैधर्म्यं भवति। अव्याप्तिरहितत्वेन सजातीय-सर्वापेक्षया साधर्म्यं भवति।

विंशप्रभृतिभिः पञ्चभिः सूत्रैः द्रव्यगुणकर्माणि एषामेव कारणभावेन साधर्म्य-वैधर्म्यरूपाणि भवन्तीत्युच्यते। इदमन्यदवान्तरप्रकरणम्। एषामेव कार्यभावेन साधर्म्यवैधर्म्यात्मकत्वप्रतिपादकं पञ्चविंशादारभ्य अष्टसूत्रात्मकं अंतिममवान्तर-प्रकरणम्। एवमुत्तरत्र सर्वत्र प्रकरणविभागो द्रष्टव्यः॥

इति कणाद सूत्रवृत्तौ सुगमायां
प्रथमाध्यायस्य प्रथममाह्निकम्॥

प्रथमाध्याये द्वितीयाह्निकम्।

(३३) कारणाभावात् कार्याभावः।१

द्रव्यगुणकर्माणि साधर्म्यवैधर्म्याभ्यां निरूपितानि। अथ सामान्यं निरूपणीयम्। तत्र सामान्यसत्त्वे किं प्रमाणं इति चेत्। तद्वक्तव्यम्। तत्र प्रत्यक्षमेव प्रमाणमिति सुवचम्। घटदर्शने हि अयं सन्, इदं द्रव्यं, इयं पृथिवी, अयं घटः, इति चाक्षुषं प्रत्यक्षं जायते। तथापि द्रव्यगुणातिरिक्तं सामान्यमिति किं नाम तत्रोपलभ्यते इत्याक्षिपन्तं प्रति इदमिति निर्दिश्य तत्प्रदर्शनं न शक्यते कर्तुम्। अतस्तस्य अनुमानं प्रमाणं प्रदर्शनीयम्। तत्र प्रथमं व्याप्तिं प्रदर्शयति अनेन सूत्रेण। कार्याभावः कारणाभाव-प्रयुक्तः इति सूत्रस्याक्षरार्थः। तेन यत्र कारणाभावः तत्र कार्याभाव इति व्यतिरेक-व्याप्तिः प्रदर्शिता भवति। यत्र कार्यं तत्र कारणमिति अन्वयव्याप्तिश्च अर्थलभ्या। द्रव्यं सत्, गुणः सन्, कर्म सत्, इत्यनुगताकारा प्रतीतिर्भवति। न चेयं बाधिता। अतः

प्रमासत्ताविषयेयं प्रतीतिः । कार्या च, चक्षुर्जन्यत्वात् । प्रतीतौ च विषयः कारणम् । न हि विषयं विना प्रतीतिर्भवितुमर्हति । तथा च अनुगतप्रतीत्यात्मककार्यरूपलिङ्गात् कारणं सामान्यमनुमीयते, इत्युक्तं भवति ।

(३४) न तु कार्याभावात् कारणाभावः ॥२

कार्यं व्याप्यं, कारणं व्यापकमिति कृत्वा पूर्वसूत्रोक्ता व्याप्तिः समीचीना । तन्मूलकमनुम नं च । एतद्विवेकाय कारणं व्याप्यं, कार्यं व्यापकमिति कृत्वा गृह्यमाणा तु व्याप्तिः दुष्टा, तन्मूलमनुमानं च दुष्टमिति अनेन सूत्रेण बोध्यते । कार्याभावप्रयुक्तः कारणाभाव इति तु न संभवति । घटानुत्पत्तावपि दण्डस्य सम्भवात् । प्रतीतिविरहेऽपि भूम्यन्तर्गतजलस्य विद्यमानत्वात् । तथा च यंत्र कार्याभावः तत्र कारणाभाव इति व्यतिरेकेण वा, यत्र कारणं तत्र कार्यमित्यन्वयेन वा व्याप्तेरभावात् कारणात् कार्यानुमानं न सम्भवति । एवमनुमानं प्रयुज्यमानं आभासरूपं स्यात् । न च एवंविधं कार्यात् कारणानुमानम् । अतः अनुगतप्रतीत्या सिद्धचति तद्विषयभूतं सामान्यम् ।

(३५) सामान्यं विशेष इति बुध्यपेक्षम् ॥३

सामान्यं द्विविधं केवलसामान्यं विशेषात्मकसामान्यमिति, इति विभागमभिप्रेत्य सामान्यमिति विशेष इति च व्यवहारे नियामकमाह । इति-इतिव्यवहरणमित्यर्थः । बुद्धिं अपेक्षत इति, बुद्धेरपेक्षा यस्येति वा बुद्धचपेक्षम् । अपेक्षा अधीनप्रवृत्तिकत्वम् । समानाकारबुद्धिजनने तज्जनको धर्मः तां बुद्धिं निमित्तीकृत्य सामान्यमिति व्यवह्रियते । व्यावृत्तिबुद्धिजनने तज्जनको धर्मः तां बुद्धिं निमित्तीकृत्य विशेष इति व्यवह्रियते । स्वकार्यभूतसमानाकारबुद्धिवशात् धर्मस्य सामान्यमिति व्यवहारः प्रवर्तते । तथा स्वकार्यभूतव्यावृत्तबुद्धिवशात् विशेष इति व्यवहारः । तत्र कश्चन धर्मः समानाकारामेव बुद्धिं जनयतिः न तु व्यावृत्तबुद्धिम् । स धर्मः केवलसामान्यम् । कश्चन धर्मः उभयीं बुद्धिं जनयति अनुवृत्तबुद्धिं च व्यावृत्तबुद्धिं च । स धर्मः विशेषात्मकसामान्यम् । सामान्यं च विशेषश्चेति यावत् । समानाकारप्रतीतिजनकत्वं बुद्धौ कृत्वा सामान्यमिति व्यवहरन्ति । व्यावृत्तप्रतीतिजनकत्वं बुद्धौ कृत्वा विशेष इति व्यवहरन्ति, इति वा बुद्धचपेक्षत्वमुपपादनीयम् ।

तत्र केवलसामान्यं तस्य तथात्वे हेतुकथनपूर्वकं दर्शयति—

(३६) भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव ।।४

भावः सत्ता । भूधातुर्हि सत्तावाची । सामान्यमेव न तु विशेषोऽपि । केवल-सामान्यमिति यावत् । कुतः । अनुवृत्तेरेव हेतुत्वात् । अनुवृत्तिरिह प्रतीतेर्विवक्षिता । एकस्यां व्यक्तौ यादृशी प्रतीतिः तादृश्या एव व्यक्त्यन्तरेषु उत्पत्तिः अनुवृत्तिः । अस्या एव हेतुः सत्ता । पृथिव्यादीनि द्रव्याणि सन्ति, रूपादयो गुणाः सन्तः, कर्माणि उत्क्षेपणादीनि सन्ति, इति त्रिष्वपि पदार्थेषु सत्तया प्रतीत्यनुवृत्तेरेव जायमानत्वात् । द्रव्यं न गुणः, न कर्म, सत्त्वादिति सत्ताहेतुकव्यावृत्तिप्रतीतेरजायमानत्वात् । सत्ता हि गुणे कर्मणि च विद्यमानत्वात् गुणभेदे कर्मभेदे वा न हेतुः । यद्यपि द्रव्यं न सामान्यं सत्त्वात् इति सामान्यादिव्यावृत्तिप्रतीतौ हेतुर्भवत्येव सत्ता, तथापि जातिमतां द्रव्यगुणकर्मणां मिथो भेदप्रतीतेरेव व्यावृत्तिपदेन विवक्षितत्वात् ईदृशव्यावृत्तिहेतु-त्वाभावाच्च सत्तासामान्यस्य, इदं केवलसामान्यमेवेति युक्तो निर्णयः ।

(३७) द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च ।।५

सामान्यस्य द्वितीयां विधामिह दर्शयति । पृथिव्यादिषु नवस्वपि द्रव्येषु द्रव्यं द्रव्यमित्यनुगतप्रतीतिहेतुत्वात् द्रव्यत्वं सामान्यम् । पृथिवी न गुणः, न कर्म, द्रव्यत्वात् इति व्यावृत्तिप्रतीतिहेतुत्वात् विशेषश्च । एवं गुणत्वकर्मत्वयोरपि द्रष्टव्यम् । अत इमानि विशेषात्मकानि सामान्यानि । न परं एत एव विशेषाः सामान्यरूपा भवन्ति, अपि तु अन्येऽपि बहवो विशेषाः तथाविधाः सन्तीति ज्ञापयन् अर्थात् सामान्यादनन्तरं निर्दिष्टं पञ्चमं पदार्थमपि लक्षयति—

(३८) अन्यत्रान्त्येभ्यो विशेषेभ्यः ।।६

विशिष्यते व्यावर्त्यते भिन्नतया बोध्यते अनेनेति विशेषः । अन्ते यावन्तो विशेषाः तेषां चरमे स्थाने भवाः अन्त्याः । यदपेक्षया अपरो विशेषो नास्ति ते अन्त्या विशेषाः । जलादिपरमाणूनां सर्वथा एकरूपत्वात् मिथो भेदसिद्ध्यर्थं एकैकस्मिन् परमाणौ एकैको विशेषोऽस्तीत्यभ्युपगम्यते । एकपरमाणुमात्रवृत्तित्वेन एकैकोऽपि विशेषः केवलं विशेष एव । न तु कथमपि सामान्यम् । अनेकवृत्तित्वे हि सामान्यत्वं स्यात् । न चास्य सामान्यत्वाभावे एतदपेक्षया अपरो विशेषः संभवति । अतः इमे अन्त्या

विशेषाः । अन्यत्रेत्यव्ययं अन्येत्यर्थे प्राचीनप्रयोगसिद्धम् । अन्त्येभ्यो विशेषेभ्योऽन्ये ये विशेषाः ते सर्वे सामान्यानि विशेषाश्च भवन्तीति पूर्वसूत्रादनुवर्त्य योज्यम् । न परं ते विशेषा एव अपि तु सामान्यान्यपि भवन्तीत्यत्र तात्पर्यम् । द्रव्यत्वं यथा सकलद्रव्यवृत्तितया सामान्यं, गुणादिव्यावर्तकतया विशेषश्च तथा पृथिवीत्वं सकलपृथिवीवृत्तित्वेन सामान्यं, अनादिव्यावर्तकतया विशेषश्च, तथा घटत्वं सकलघटवृत्तित्वेन सामान्यम्, परादिव्यावर्तकतया विशेषश्च । एवं गुणत्वव्याप्यधर्मेषु रूपत्वशुक्लत्वादिषु, कर्मत्वव्याप्यधर्मेषु पाकत्वगमनत्वादिष्वपि द्रष्टव्यम् ।

एवं शब्दतः द्रव्यत्वगुणत्वकर्मत्वव्यतिरिक्ताः अन्त्यविशेषभिन्नाश्च बहवो विशेषाः सामान्यात्मानः सन्तीति प्रतिपादनेऽपि, विशेषाः द्विविधाः सामान्यरूपाः केवलाश्चेति विभागः, पदार्थनिर्देशसूत्रे विशेषपदेन केवला एव विवक्षिताः, तेषां च अनुगताकारप्रतीतिहेतुत्वाभावे सति व्यावृत्तिप्रतीतिहेतुत्वं लक्षणमिति ज्ञापनं च अर्थतोऽभिप्रेतमिति ज्ञेयम् ।

इमे अन्त्या विशेषाः सर्वनित्यद्रव्यवृत्तयः ॥

इत्थं सामान्ये प्रमाणमुक्तम् । विभागश्च कृतः । अथ तत्र अन्यत् किमपि वक्तुं सत्तायाः पूर्वोक्तां प्रमाणतः सिद्धिमनुवदति ।

(३९) सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ॥७

अत्र प्रतीतिरित्यध्याहार्यम् । द्रव्येषु गुणेषु कर्मसु च परस्परं भिन्नेष्वपि सदिति एकाकारा प्रतीतिः विषयविधया हेतुभूतात् यस्मात् पदार्थात् भवति स पदार्थः सत्ता सत्ताशब्दवाच्या । पूर्वं भाव इत्युक्तोऽर्थः इह सत्ताशब्दप्रयोगात् विवृतः ॥

विवक्षितमाह—

(४०) द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ॥८

अन्योऽर्थः अर्थान्तरम् । सत्ता न द्रव्यं, न गुणः, न कर्म । अपितु पृथक्पदार्थान्तरमित्यर्थः । सन्ति बहवः सामान्यतदाश्रययोरभेदं वदन्तः । ते न सम्यग्दर्शिनः । अन्यत्सामान्यम् । अन्यश्च तदाश्रयः । प्रतीतिबलादिति भावः ॥

ननु आश्रयाश्रयिभावात् व्यक्तिभेदः सिद्धयतु । पदार्थान्तरत्वं तु कथं इत्यत्राह :—

(४१) गुणकर्मसु च भावान्न कर्म न गुणः ॥६

गुणाश्च कर्माणि च, तेषु । चकारः द्रव्यसमुच्चये । यथा द्रव्येषु तथा गुणकर्मसु च सत्ता वर्तते । भावो वृत्तिः विद्यमानत्वम् । यस्माद् गुणेषु च वर्तते तस्मात् सत्ता न कर्म न गुणः । यस्मात् कर्मसु च वर्तते तस्माच्च सा न कर्म न गुणः । सत्ता न गुणः गुणवृत्तित्वात् । द्रव्यभेदवत् कर्मभेदवच्च । एवं सत्ता न कर्म कर्मवृत्तित्वात् । द्रव्यभेदवद् गुणभेदवच्चेत्यपि प्रयोगो द्रष्टव्यः । न चाप्रयोजकत्वम् । गुणानां कर्मणां वा गुणवत्त्वे कर्मवत्त्वे वा प्रमाणाभावात् । न हि पृथिवी गन्धवतीत्यादिवत् गन्धः एतद्गुणवान् एतत्क्रियावान् इत्यादिरीत्या कुत्रचित् कदाचित् कस्यचित् प्रतीतिरस्ति । न च गन्ध एकः इति संख्यारूपो गुणः, रसः पृथक् इति पृथक्त्वगुणश्च गुणेषु वर्तते । एवं कर्मस्वपीति वाच्यम् । गन्धाश्रयस्य द्रव्यस्यैकत्वेन तद्गतस्य गन्धस्यैकत्वव्यवहार इत्येवमुपपत्तौ गन्धस्य स्वातन्त्र्येण संख्याश्रयत्वायोगात् । एवं पृथक्त्वाश्रयत्वमपि न युज्यते । द्वे ज्ञाने इति ज्ञानद्वित्वं विषयगतेन ज्ञातृगतेन कालोपाधिद्रव्यगतेन वा द्वित्वेनोपपाद्यम् । द्वौ शब्दाविति अभिव्यञ्जकवायुगतेन । द्वे क्रिये इति आश्रयद्रव्यभेदे सति तद्गतद्वित्वेन अन्यथा कालोपाधिद्रव्यगतेन । एवं सर्वत्र अन्यथैव प्रतीत्युपपत्तिसम्भवात् गुणकर्मणोः गुणो वा कर्म वा नास्तीति निश्चीयते । अस्ति तु सत्तासामान्यम् । अतो नेदं गुणः कर्म वा । ननु यद्यप्येवं सत्ता न गुणः नापि कर्म । अथापि द्रव्यं स्यात् । न हि द्रव्ये भावान्न द्रव्यमिति वक्तुं शक्यम् । अवयवद्रव्ये अवयविद्रव्यस्य वर्तमानत्वात् इति चेन्न, गुणकर्मसु च भावादित्यनेन द्रव्यमात्रवृत्तित्वाभावादिति हेत्वन्तरस्याप्याक्षिप्तत्वात् । तथा च सत्ता न गुणः कर्म वा द्रव्यमात्रवृत्तित्वाभावात् इति यथाऽस्य हेतोः गुणकर्मभेदसाधकत्वं तथा "न द्रव्यं, द्रव्यमात्रवृत्तित्वाभावात्, गुणभेदवत्कर्मभेदवद्वा" इति द्रव्यभेदसाधकत्वमप्यव्याहतम् । अतः "सत्ता न द्रव्यं द्रव्यवृत्तित्वात् गुणवत्कर्मवद्वा" इत्यनुमानस्य साध्याभाववति अवयविद्रव्ये हेतोः सत्वेन अनैकान्तिकत्वादसाधकत्वेऽपि न दोषः । अत्र गुणेषु भावान्न गुणः । कर्मसु भावान्न कर्म, इति यथासंख्यं न विवक्षित-

मिति ज्ञापनाय गुणकर्मसु इति समासकरणं, उपरि न कर्म न गुण इति क्रमान्तराश्रयणं चेति ज्ञेयम् ।

(४२) सामान्यविशेषाभावेन च ॥१०

सत्तायाः द्रव्यगुणकर्मभ्योऽर्थान्तरत्वे हेत्वन्तरमिदम् । सामान्यस्य वा सामान्यात्मकविशेषस्प वा सत्तायामभावाच्च सत्ता द्रव्यं वा गुणो वा कर्म वा न भवति । द्रव्ये सत्तासामान्यं द्रव्यत्वं च, गुणे सत्ता गुणत्वं च, कर्मणि सत्ता कर्मत्वं च इत्युभयमस्ति । न चैवं सत्तायामस्ति । न तावत् तत्र सत्ता वर्तते । स्वस्य स्ववृत्तित्वायोगात् । नापि द्रव्यत्वादिकम् । इयं द्रव्यं गुणः कर्म वा इति प्रतीतिविरहात् । अतः सामान्यविशेषाभावात् सत्ता न द्रव्यं गुणः कर्म वा ।

ननु सत्तायां सत्ताद्रव्यत्वादिविरहेऽपि सामान्यत्वं नाम सामान्यं वर्तत एव । अतः सामान्यविशेषाभावेनेति हेतुरसिद्ध इति चेन्न । सामान्यमिति हि समानधर्म उच्यते । अतोऽस्य भावः सामान्यत्वं समानधर्मत्वमेव । सखण्डपदार्थरूपमिदं न सत्ताद्रव्यत्वादिवत् अखण्डधर्मरूपं सामान्यं भवति । न च सतो भावः सत्तेति सत्ताऽपि सखण्डपदार्थ एवेति शङ्क्यम् । शब्दस्यैवं व्युत्पादनेपि अखण्डधर्मस्यैव तेन वाच्यत्वात् । अनवस्थात्मकं जातिबाधकं चात्र द्रष्टव्यम् ।

(४३) अनेकद्रव्यवत्त्वेन द्रव्यत्वमुक्तम् ॥ ११

द्रव्यत्वस्य द्रव्यादिभ्यः पदार्थान्तरत्वं साधयितुं प्रथमं तस्य प्रमाणसिद्धत्वं स्मारयति । द्रव्यत्वं सामान्यमिति पूर्वमुक्तम् । केन हेतुना । सर्वेषु द्रव्येषु द्रव्यं द्रव्यमिति अनुगतप्रतीतिहेतुत्वेन । अनेकानि द्रव्याणि अनुगतप्रतीतिविषयधर्मित्वेन अस्य वर्तन्त इति अनेकद्रव्यवत् । तत्त्वेन । अत्र अनेकद्रव्यगत्वेनेति, अनेकद्रव्यगतत्वेनेति वा किं पाठान्तरमस्तीति विमर्शनीयम् ।

अत्र द्रव्यगुणकर्मभ्योऽर्थान्तरं द्रव्यत्वम् । सामान्यत्वात् सत्तावदिति अतिरिक्तत्वमपि उक्तं अनुसन्धेयम् ।

अतिरिक्तत्वे पूर्ववत् हेत्वन्तरमाह —

(४४) **सामान्यविशेषाभावेन च ॥ १२**

इति । न द्रव्यत्वे सत्ता वर्तते । द्रव्यं सत् इत्यादिरूपाया एवानुगतप्रतीतेः सत्वात् । द्रव्यत्वं सदित्येवंरूपायाः अभावात् । ननु द्रव्यत्वमस्तीति व्यवहारोऽस्त्येव । तेन द्रव्यं सदिति प्रत्ययोऽपि अस्तीत्येवाभ्युपगन्तव्यमिति चेन्न । एतादृशव्यवहारस्य अस्ति प्रमाविषयः, सत् कालसंबन्धि, इत्याद्यर्थान्तरपरत्वात् । सत्तासामान्यपरत्वाभावात्, इत्थं द्रव्यत्वं द्रव्यमित्यादिप्रतीतिविरहात् द्रव्यत्वादिकमपि तत्र नास्तीति ज्ञेयम् । एवं सामान्यविशेषाभावेन द्रव्यत्वं न द्रव्यं, न गुणः, न कर्म ।

(४५) **तथा गुणेषु भावात् गुणत्वमुक्तम् ॥ १३**

गुणत्वसामान्यस्य पदार्थान्तरत्वोपपादनाय पूर्वोक्तां तस्य सिद्धिमनुवदति । यथा त्रिषु पदार्थेषु अनुगतप्रतीतिविषयतया विद्यमानत्वेन सत्ता सिद्धा, यथाच सर्वेषु द्रव्येषु तथाविधप्रतीतिविषयतया विद्यमानत्वेन द्रव्यत्वं सिद्धमित्युक्तं, तथा सर्वेषु गुणेषु अनुगतप्रतीतिविषयतया विद्यमानत्वेन गुणत्वमपि सिद्धमित्युक्तमित्यर्थः ।

द्रव्यगुणकर्मभ्योऽर्थान्तरं गुणत्वम् । सामान्यत्वात् । सत्तावत् द्रव्यत्ववच्चेत्यप्युक्तमित्यनुसंधेयम् ।

अत्र पूर्ववत् 'अनेकगुणवत्त्वेन गुणत्वमुक्तम्' इति सुवचम् । पूर्वमेव वा "द्रव्येषु भावाद् द्रव्यत्वमुक्तम्" इति । तथापि अनेकव्यक्तिवृत्तित्वं सामान्यस्य जीवितमित्येतत्स्फुटीकरणाय बहुवचनगम्यमिदं पूर्वं कण्ठोक्तम् । अत्र तत्सुगममिति बहुवचनमेव आदृतमिति ज्ञेयम् । अस्मिन् सूत्रे तथेत्येतत् किं सूत्रकारेणैव प्रयुक्तं, अवतारिकारीत्या पश्चात् कैश्चिद्योजितं वेति युक्ता चिन्ता ।

(४७) **सामान्यविशेषाभावेन च ॥ १४**

पूर्ववत् गुणत्वस्य द्रव्यगुणकर्मभ्योऽर्थान्तरमिदम् । न हि गुणत्वे सत्ता वा द्रव्यत्वादिकं वा अस्ति । अतः तेभ्यः पदार्थान्तरमिदम् ।

(४७) कर्मसु भावात् कर्मत्वमुक्तम् ॥ १५

कर्मत्वसामान्यसिद्धिं पूर्वोक्तां स्मारयति । सर्वेषु कर्मसु अनुगतप्रतीतिविषयतया विद्यमानत्वात् कर्मत्वं सिद्धमित्युक्तम् । कर्मत्वं द्रव्यगुणकर्मभ्योऽर्थान्तरं ज्ञेयम् । सामान्यत्वात् सत्तादिवत्, इति अर्थान्तरत्वमप्युक्तं ज्ञेयम् ।

(४८) सामान्यविशेषाभावेन च ॥ १६

अर्थान्तरत्वे पूर्ववत् हेत्वन्तरमिदमिति स्पष्टम् ।

(४९) सदिति लिङ्गाविशेषात् विशेषलिङ्गाभावाच्चैको भावः ॥ १७

सामान्यसत्त्वे प्रमाणं तद्द्वैविध्यं तस्य पदार्थान्तरत्वं च स्थापितम् । अथास्य एकत्वं स्थापयति । अनेकासु व्यक्तिषु एकाकारा प्रतीतिः सामान्ये प्रमाणमित्युक्तम् । या इमाः अनेकवस्तुषु समानप्रकारा बुद्धयः ताः सर्वाः तद्वस्तुवृत्त्येकधर्मप्रयुक्ताः, समानाकारबुद्धित्वात् । एकमेव दण्डं क्रमेण धारयत्सु पुरुषेषु, अयं दण्डी अयं दण्डीति जायमानबहुबुद्धिवत् इत्यनुमानं तत्राऽभिप्रेतम् । या नैवं ता नैवं यथा घटपटदण्डकुण्डलादिप्रकारकबुद्धयः, इति व्यतिरेक्यनुमानं च । एवं एकैकमपि सामान्यं प्रमाणेन सिद्धयत् एकमेव सिद्धयति । अनेकत्वसंशयस्यापि नास्त्यवसरः । तथाऽपि मन्दमतिः कोऽपि तथा मा शङ्किष्टेति, अनेनैव प्रकारेण वस्त्वन्तरेषु एकत्वं साधनीयमिति उत्तरत्र प्रतिपादनसौकर्याय च सिद्धमेव सत्तायाः एकत्वं साधयत्यनेन सूत्रेण । सदिति अनुवृत्तप्रतीतिरूपं यत् लिङ्गं ईदृशप्रतीतिधर्मिकं समानाकारत्व-हेतुकं यदनुमानं तदिह लिङ्गपदेन विवक्षितम् । तस्य अविशेषात्, विशेषाभावात्; सत्तासामान्यस्य एकत्वविरोधिनानात्वापादकाकारस्य अभावात् । सदिति प्रतीतिरेव वा लिङ्गमिति विवक्षिता । एकस्मिन् पदार्थे सदिति प्रतीतिर्यादृशी तादृश्येव साक्षात् पदार्थान्तरेऽपि । न मात्रयाऽपि वैलक्षण्यम् । अतो नानात्वहेतोरभावात् एकैव सत्तेति प्रतितिष्ठति । यद्यपि साधकप्रमाणे नास्ति स विशेषः येन सत्तानानात्वं भवेत्, तथापि प्रमाणान्तरेण तत् किं न भवेदित्यत्राह—विशेषलिङ्गाभावाच्चेति । विशेषं

च तत् लिङ्गं च विशेषलिङ्गम्। तस्या भावात्। लिङ्गं ज्ञापकं प्रमाणमित्यर्थः। तन्नानात्वबोधकं प्रमाणान्तरमपि किमपि नास्तीति भावः। सत्तासाधक-प्रमाणस्य एकत्वमात्रबोधकत्वेन नानात्वबोधकप्रमाणान्तराभावेन च सत्ता एकैव, न नानेत्यर्थः।

अत्र सत्ताया एकत्वं न सङ्ख्यारूपम्। अपि तु स्वसजातीयद्वितीयरहितत्व-रूपम्। द्रव्यमिति लिङ्गाविशेषात् विशेषलिङ्गाभावाच्चैकं द्रव्यत्वमित्याद्यपि बोध्यम्।

इति कणादसूत्रवृत्तौ सुगमायां

प्रथमाध्याये द्वितीयमाह्निकम्।

सिद्धान्तलक्षणजागदीशीतत्त्वालोकव्याख्या

पण्डित श्री कृष्णमाधव झा

अथ साध्यानुयोगिकभेदकल्पः ।

नीले पादसरोजं ते, कामकोटिफलप्रदम् ।
कुरु गूढार्थसारल्यं स्थामहं सफलः सुखी ॥१॥
राधाबिम्बसमायुक्तः, प्रतिबिम्बोऽपि तादृशः ।
स मे कृष्णः सदा पातु द्रौपदीत्राणकारकः ॥२॥
आलोके निहितार्थोऽपि सम्यङ् नैव प्रकाशते ।
तदर्थं कृतयत्नोऽहं नीलाधीनं फलं भवेत् ॥३॥
बिठ्ठोग्रामनिवासोऽयं गोवर्द्धनसुतः सुधीः ।
करोति सरलां व्याख्यां तत्त्वालोकप्रकाशिनीम् ॥०॥

नन्वित्यादि शङ्कायां सिद्धान्तमाह—"अत्रोच्यते" इति । मयेत्यध्याहार्यम् । अस्मत्पदार्थो मणिकारः गङ्गेशोपाध्यायः । तस्य समवेतत्वसंबन्धेन तृतीयार्थ-कृतावन्वयः, तस्याश्च जन्यतासंबन्धेन धात्वर्थव्यापारेऽन्वयः, धात्वर्थश्च ज्ञानानु-कूलो व्यापारः, तस्य निरूपितत्वसंबन्धेन कर्माख्यातविषयतायामन्वयः, तस्याः स्वरूपसंबन्धेन प्रथमान्तपदार्थव्याप्तावन्वयः । तथा च मणिकारसमवेतकृतिजन्य-ज्ञानानुकूलव्यापारनिरूपितविषयतावती जिज्ञासाविषयीभूता प्रतियोग्यसमानाधि-करणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामानाधिकरण्या-भिन्ना व्याप्तिरिति चिन्तामणिवाक्यार्थः ।

अथवा मूले नन्वित्यादि शङ्कासिद्धान्तमाह—"अत्रोच्यते" इत्यादि । जिज्ञासाविषयीभूता पूर्वपक्षसमाप्त्यनन्तरं वा प्रतियोगिव्यधिकरणहेतुसमानाधि-करणाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामाधिकरण्याभिन्ना व्याप्तिः प्रति-पत्त्यनुकूलव्यापारविषय इत्यर्थः ।

अथ संबन्धप्रतियोग्यनुयोगिपदार्थयोरव्यवधानेनोपस्थितिरूपाया आसत्तेः, अव्यवहितोत्तरत्वपूर्वत्वान्यतरसंबन्धेनैकपदसाकाङ्क्षपदविशिष्टापरपदज्ञानरूपाकाङ्क्षाज्ञानस्य वा अभावेन कथमत्र साध्ये तादृशप्रतियोगितावच्छेदकावच्छिन्नभेदप्रतीतिः ? न च मा प्रतीयतां को दोषः, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नवृत्तिभेदप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थे क्षत्यभावादिति वाच्यम् । वह्नित्वावच्छिन्नेत्याद्यग्रिमव्याप्तिपरग्रन्थे साध्ये एव भेदविरोधिप्रतियोगितावच्छेदकीभूततादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वप्रदर्शनेन साध्यानुयोगिकतादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्यैव लक्षणघटकताप्रतीतेः । ननु ग्रन्थविरोधेन शाब्दासत्त्याकाङ्क्षाज्ञानयोः कार्यकारणभावस्य सङ्कोचोऽनावश्यक इति चेन्न धूमवान् वह्नेरित्यत्रातिव्याप्तेः । तादृशाभावप्रतियोगिघटे साध्यतावच्छेदकधूमत्वावच्छिन्नप्रतियोगिताकभेदस्य सत्त्वेन तत्सामानाधिकरण्यस्य वह्नौ सत्त्वात् । न चावच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वेन तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकभेदप्रतियोगिसाध्यसामानाधिकरण्यस्यैव व्याप्तित्वमिति प्रकृते नोक्तदोषः । भेदस्य स्वप्रतियोगितावच्छेदकेन सह विरोधेन तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्ने धूमे धूमत्वावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदासत्त्वादिति वाच्यम् । तादृशाभावप्रतियोगिनि धूमे धूमघटोभयभेदस्य सत्त्वेन तत्रातिव्याप्तेस्तादवस्थ्यात् । न च तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकभेदप्रतियोगितावच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः, किं वा तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकः साध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रतियोगिताकभेदः तत्प्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति कथनेन उभयभेदमादाय नोक्तदोषः । धूमघटोभयभेदप्रतियोगितावच्छेदकत्वस्य धूमत्वघटत्वोभयत्वैतत्त्रितयपर्याप्तत्वेन धूमत्वमात्रापर्याप्तत्वात् । तादृशभेदीयप्रतियोगितायां साध्यतावच्छेदकेतरघटत्वाद्यवच्छिन्नत्वस्य सत्त्वेन साध्यतावच्छेदकेतरानवच्छिन्नत्वस्य तत्रासत्वात् तन्निरूपकाभावस्य लक्षणाघटकत्वेन नोभयभेदमादायातिव्याप्तिरिति वाच्यम् । एवं सति प्रमेयवान् धूमादित्यत्राव्याप्तेः ।

प्रमेयत्वस्य भेदप्रतियोगितानवच्छेदकत्वेन प्रतियोग्यसमानाधिकरणहेतु-समानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्ने साध्यतावच्छेदकप्रमेयत्वावच्छिन्नप्रतियोगिताकभेदस्याप्रसिद्धेः । उभयभेदस्य व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेन उभयघटकप्रत्येक सत्वात् । तस्य केवलान्वयित्वेन वह्निधूमोभयवान् वह्नेरित्यत्रातिव्याप्तेश्च । अयं न द्वौ इति प्रतीत्या व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकप्रत्येकवृत्तिधर्मावच्छिन्नानुयोगिताकभेदस्य प्रामाणिकत्वात् । न च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकोभयावृत्तिधर्ममात्रावच्छिन्नप्रतियोगिताकभेदप्रतियो-गितावच्छेदकसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति कथने प्रमेयवान् धूमादित्यत्र तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकोभयावृत्तिधर्ममात्रावच्छिन्नतत्प्रमेयाभावप्रतियोगितावच्छेदकसमानाधिकरणप्रमेयत्वावच्छिन्नसामानाधिकरण्यस्य धूमे सत्वेन नोक्तदोषः । एवं वह्निधूमोभयवान् वह्नेरित्यत्र नातिव्याप्तिः, उभयावृत्तिधर्ममात्रावच्छिन्नप्रतियोगिताकस्य तत्तद्धूमत्वावच्छिन्नप्रतियोगिताकभेदस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसाध्याभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्नत्वाव्यापकत्वेन तद्धूमभेदस्य न लक्षणघटकत्वम्, तादृशान्यभेदप्रतियोगितावच्छेदकसामानाधिकरण्यस्य साध्यतावच्छेदकेऽसत्त्वादिति-वाच्यम् । एवं सति तादात्म्येन प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तेः । उभयावृत्ति-धर्ममात्रावच्छिन्नप्रतियोगिताकभेदस्य हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभाव प्रतियोगितावच्छेदकावच्छिन्नत्वाव्यापकत्वेन तस्य लक्षणाघटकतया तादृशभेदाप्रसिद्धेः । चालिनीन्यायेन सर्वासां तत्तद्व्यक्तीनां, तादृशस्य भेदस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नत्ववति स्वस्मिन् स्वभेदासत्वेन, तदव्यापकत्वात् ।

अत एव प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकप्रतियोग्यवृत्तिभेदप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति निरस्तम् । तादात्म्येन प्रमेयवान् वाच्यत्वादित्यत्र तादात्म्यसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्याऽव्याप्त्यापत्तेः । न च व्युत्पत्तिवैचित्र्येण प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छेदेन साध्यतावच्छेद-

कत्वावच्छिन्नप्रतियोगिताकभेदः तादृशभेदीयप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति कथने तादात्म्येन प्रमेयवान् वाच्यत्वादित्यत्र नाव्याप्तिः, साध्यतावच्छेदकताभेदस्य तादृशप्रतियोगितावच्छेदकत्वव्यापकत्वादिति वाच्यम् । तथा सति प्रमेयवत्त्वान् तद्व्यक्तित्वादित्यत्राव्याप्तेः, तादृशप्रतियोगितावच्छेदके घटत्वे साध्यतावच्छेदकप्रमेयभेदस्यासत्त्वात्, घटत्वस्य प्रमेयत्वात् । न च तादृशाभावप्रतियोगितानिरूपितावच्छेदकतात्वावच्छेदेन साध्यतावच्छेदकताविशिष्टान्यत्वविवक्षणेनादोषः । वै० स्वसामानाधिकरण्य, स्वावच्छेदकसंबन्धावच्छिन्नत्व, स्ववृत्तित्व, स्वानवच्छेदकानवच्छिन्नत्वैतच्चतुष्टयसंबन्धेन । वृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन । तथा च यादृशसाध्यतावच्छेदकताविशिष्टान्या प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकता तादृशसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः । प्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टान्यत्वस्य प्रतियोगितावच्छेदकतायां सत्त्वेन तादृशसाध्यतावच्छेदकप्रमेयावच्छिन्नसामानाधिकरण्यस्य हेतौ सत्त्वादिति वाच्यम् । एवं सति महद्गौरवात्, नञ्व्यत्यासकल्पनापेक्षया गौरवादिति चेत् शृणु । प्रकृते विवक्षितलघुलक्षणज्ञानाय तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नपद, नञ्पदार्थयोरव्यवधानेनोपस्थितिकल्पनायाः, तादृशशब्दयोश्चाव्यवधानेन अन्वयानुसन्धानकल्पनायाश्च युक्तत्वम् । नायं सुधांशुरित्यादौ तथादर्शनेन अत्र तथाकल्पनाया नायुक्तत्वम् । व्याप्तिलघुलक्षणस्यैव नियामकत्वात् । किं वा व्याप्तिलक्षणस्य निर्दुष्टत्वाच्च । तथा च साध्ये तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्येष्टस्य लक्षणघटकत्वोपपत्तिः । एवञ्च यत्पदघटितवाक्ये नञ्समभिव्याहारे यत्पदार्थस्य विशेष्ययोग्यत्वं स एव नञ्समभिव्याहारे विशेष्यः । प्रतियोग्यभावान्वयस्य तुल्ययोगक्षेमत्वात् ।

अथ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदवत्साध्यसामानाधिकरण्यं व्याप्तिरित्यस्य धूमवान् वह्नेरित्यत्रातिव्याप्तिः । तादृशप्रतियोगिघटभेदस्य साध्ये धूमे सत्त्वात् । न च तादृशाभावप्रतियोगितावच्छेदकपर्याप्तावच्छेदकताकप्रतियोगिताकसामान्यभेदवत्साध्यसामानाधिकरण्यं व्याप्तिरिति कथने नोक्तदोषः, तादृशाभावप्रतियोगिधूमसामान्यभेदस्य साध्ये

धूमेऽसत्त्वादिति वाच्यम् । एवं सति हेत्वधिकरणे यावान्नास्तीत्यभावप्रतियोगितावच्छेदकयावत्त्वावच्छिन्नत्वस्य साध्यमात्रे सत्त्वेनासंभवापत्तेः । न चास्तु तादृशाभावप्रतियोगिनि साध्यभेदो यथाश्रुत इति वाच्यम् । नानाव्यक्तिसाध्यकस्थलाव्याप्तिप्रदर्शकवह्नित्वावच्छिन्नस्येत्यादि ग्रन्थविरोधापत्तेः । अनेन ग्रन्थेन साध्ये एव तादृशाभावप्रतियोगिकभेदस्य लाभात् ।

यत्तु प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति ग्रन्थेन हेतुसमानाधिकरणाभाववृत्त्युभयावृत्तितत्तदभावत्वधर्मनिष्ठाच्छेदकताभिन्नावच्छेकतात्वनिष्ठावच्छेदकताभिन्नावछेदकत्वानिरूपिताभावनिष्ठावच्छेद--कताभिन्नावच्छेदकत्वानिरूपितप्रतियोगित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपिता--वच्छेदकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितधर्मनिष्ठावच्छेदकताभिन्नावच्छेद--कत्वानिरूपितावच्छिन्नत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटवत्साध्यसामानाधिरकरण्यं व्याप्तिरिति विवक्षणे (तादृशाभावप्रतियोगितावच्छेदकतावद्धर्मावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटवत्साध्यसामानाधिकरण्यं व्याप्तिरिति विवक्षणे) समवायेन प्रमेयवान् वाच्यत्वादित्यत्र साध्यतावच्छेदकप्रमेयत्वावच्छिन्नप्रतियोगिताकभेदस्याप्रसिद्धत्वेऽपि हेतुसमानाधिकरणतादृशघटपटादितत्तत्प्रमेयाभावप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदकूटस्य साध्ये विरहान्नातिव्याप्तिः । वह्निमान् धूमादित्यत्र तादृशभेदकूटस्य वह्नौ सत्त्वेन नासंभव इति । तन्न साध्यानुयोगिकभेदीय प्रतियोगितावच्छेदकतायाम् इतरवारकपर्याप्तिनिवेशेऽपि समवायेन प्रमेयवान् वाच्यत्वादित्यत्र अतिव्याप्तेस्तादवस्थ्यात् । यथाश्रुते प्रतियोगिव्यधिकरणस्यापि यथाश्रुतस्यैव (अपारिभाषिकस्यैव) साध्यतावच्छेदकसंबन्धेन प्रतियोग्यधिकरणावृत्तित्वस्य प्रवेशेन समवायेन असमवेत प्रमेयस्याधिकरणाप्रसिद्ध्या हेत्वधिकरणे प्रतियोगिव्यधिकरणत्वेन तदभावस्य गगनादेः अत्र धर्तुमशक्यतया तादृशाभावप्रतियोगिसमवेतप्रमेयप्रतियोगिकभेदकूटस्य असमवेतप्रमेये सत्त्वेन तद्वत्साध्यसंबन्धित्वस्य व्यभिचारिणि वाच्यत्वे सत्त्वात् । धनी चैत्रत्वादित्यत्राव्याप्तिवारणाय तादृशसंबन्धित्वस्यैव विवक्षणीयत्वात् ।

प्रमेयत्वावच्छिन्नाप्रतियोगिकत्वे सति घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्ति-वाच्यत्ववत्त्वसमवायान्यतरसंबन्धेन प्रमेयवान् वाच्यत्वादित्यत्रातिव्याप्तेश्च । स्व-(अभाव) प्रतियोगितावच्छेदकावच्छिन्नाधिकरणभेदकूटवदधिकरणकाभावस्यैव-प्रतियोगिव्यधिकरणत्वेन तदीयप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्नप्रतियोगिताक भेदानुयोगिकपर्याप्तिप्रतियोगिकूटवत्त्वस्य साध्ये सत्त्वेन तादृशसाध्यसामानाधिकरण्यस्य हेतौ सत्त्वात् ।

एवं प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदानुयोगिताकपर्याप्तिप्रतियोगिकूटवत्साध्यसामानाधिकरण्यं व्याप्तिः ।

अथवा प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वसामानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटवत्साध्यसामानाधिकरण्यं व्याप्तिरिति विवक्षणेनातिव्याप्तिविरहेऽपि सर्वेषां साध्यानां हेतुसमानाधिरकरणप्रतियोगिव्यधिकरणयावान्नास्तीत्यभावीयप्रतियोगितावच्छेदकयावत्त्वावच्छिन्नत्वेन तादृशकूटस्य साध्येऽसत्त्वेन असंभवापत्तेः ।

अत एव प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वव्यापककूटत्वावच्छिन्नवत्साध्यसामानाधिकरण्यं व्याप्तिः, व्यापकता च स्वाश्रयभेदप्रतियोगितावच्छेदकत्वसामानाधिरकरण्येनेत्यपि निरस्तम् । सर्वेषां साध्यानां यावान्नास्तीत्याकारकतादृशाभावप्रतियोगित्वेन तादृशभेदकूटस्य साध्येऽसत्त्वेन असंभव इति । प्रमेयत्वावच्छिन्नाप्रतियोगिकत्वे सति घटत्वावच्छिन्नाप्रतियोगिक स्ववृत्तिवाच्यत्ववत्त्वसवमायान्यतरसंवन्धेन प्रमेयवान् वाच्यत्वादित्यत्रातियाव्प्तेस्तादवस्थ्यात् । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियगितावच्छेदकतत्तद्-घटत्वनिष्ठावच्छेदकताव्यापकत्वस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वे स्वाश्रयभेदप्रतियोगिता वच्छेदकत्वसामानाधिकरण्यसंबन्धेन सत्त्वात् । व्याप्यतावच्छेदकसंबन्धस्तादात्म्यरूपः । यदि

स्वरूपसंबन्धो व्याप्यतावच्छेदको भवेत् तदा स्वाश्रयभेदप्रतियोगितावच्छेदकत्वसंबन्धो व्यापकतावच्छेदको बोध्यः ।

प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वसमानाधिकरणोभयावृत्तिधर्मव्यापकतायाः स्वाश्रयाश्रयभेदप्रतियोगितावच्छेदकत्वसामानाधिकरण्यसंबन्धेन कूटत्वे निवेशे च साध्यस्य हेत्वधिकरणे साध्यघटोभयाभावस्य यावान्नास्तीत्यभावस्य वा प्रतियोगित्वेन तत्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदकूटस्य तादृशस्य तत्र (साध्ये) असत्त्वेन असंभवस्तदवस्थ इति चेन्न । साध्यतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मानवच्छिन्ना या प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिता तादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसामान्यभेदवत्साध्यसामानाधिकरण्यं व्याप्तिरिति विवक्षणेनादोषात् । साध्यघटोभयाभावस्य यावान्नास्तीत्यभावस्य च साध्यतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेन लक्षणाघटकत्वात् ।

स्ववृत्तिभेदीयतद्घटत्वावच्छिन्नप्रतियोगितासंबन्धेन तद्घटः पटवान् तद्घटत्वादित्यादौ हेतुसमानाधिकरणस्य घटपटोभयाभावस्य यावान्नास्तीत्यभावस्य च या प्रतियोगिता तदवच्छेदकावच्छिन्नप्रतियोगिताकस्य घटपटोभयभेदस्य यावद्भेदस्य च साध्ये सत्त्वेन लक्षणसमन्वय इति ।

साध्यतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य हेतुसमानाधिकरण प्रतियोगिव्यधिकरणाभावीयप्रतियोगितायां निवेशेन तयोरभावयोर्लक्षणाघटकत्वात् न तदभावावादायासंभवासंभवाच्च । बह्निधूमोभयवान् बह्ने रित्यादौ अतिव्याप्तिवारणाय व्यासज्यवृत्तिधर्मे साध्यतावच्छेदकातिरिक्तत्वनिवेशः । इति साध्यानुयोगिक भेदकल्पः ।

अथ बह्नित्वावच्छिन्नत्वस्येति ।

अत्र बह्नित्वावच्छिन्नस्येत्युक्तिः सार्वभौमव्याख्यां दूषयितुम् । तथाहि बह्निमान् धूमादित्यादिनानाव्यक्तिसाध्यकसद्धेतौ चालिनीन्यायेन तत्तत्साध्याभावप्रतियोगित्वस्य साध्ये सत्त्वेनाव्याप्तिः । तद्वारणाय लक्षणघटकं यत्पदं लुप्तसप्तमी-

कम् । अवच्छिन्नपदं च अवच्छेदकतानिरूपितार्थकम् (प्रतियोगित्वम्) स्वीकृत्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगित्वा—त्यन्ताभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्रैव तात्पर्यम् । प्रतियोगिताया अव्याप्यवृत्तित्वेन तद्व्यक्तित्वावच्छेदेन वर्तमानायाः साध्यनिष्ठायाः प्रतियोगितायाः बह्नित्वादिसाध्यतावच्छेदकावच्छेदेनाभावात् बह्निमान् धूमादित्याद्यनेकव्यक्तिसाध्यके नाव्याप्तिः । न च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्यशून्यसाध्यसामानाधिकरण्यं व्याप्तिरित्येवास्तु व्याप्तिलक्षणं किमिति शिरोवेष्टनेन नासिकास्पर्शानुधावनमिति वाच्यम् । (तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदवत्साध्यसामानाधिकरण्यं व्याप्तिरिति कथनं व्यर्थमिति यावत्) । तत्संबन्धावच्छिन्नप्रतियोगिता तत्संबन्धप्रतियोगिन्येव वर्तते इति पक्षे समवायेन द्रव्यवान् प्रमेयत्वादित्यादावतिव्याप्तेः । समवायसंबन्धावच्छिन्न द्रव्यत्वावच्छिन्नप्रतियोगितायाः समवेतद्रव्यनिष्ठायाः तादृश्या असमवेतगगनादावसत्त्वेन तच्छून्यगगनसंबन्धित्वस्य प्रमेयत्वे सत्त्वात् । तदुक्तौ तु नोक्तदोषः, प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभावीयसमवायसंबन्धावच्छिन्नद्रव्यत्वावच्छिन्नप्रतियोगितावच्छेदक—द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदीयप्रतियोगिताया असमवेतद्रव्ये गगनादावपि सत्त्वेन तदभावस्य तत्रासत्त्वात् । ननु द्रव्यवान् प्रमेयत्वादित्यत्र हेत्वधिकरणे गुणादौ यथा समवायेन समवेतद्रव्याभावः, तथा गगनं नास्तीत्याद्यसमवेतद्रव्याभावोऽपि साध्यतावच्छेदकसमवायेन प्रतियोगिव्यधिकरणः तदीयप्रतियोगिताशून्यत्वस्य गगनादावसत्त्वेन नातिव्याप्तिरिति तादृशप्रतियोगिताशून्यत्वमेव साध्ये निवेश्यं किं शिरोवेष्टनेन नाशिकास्पर्शनेनेति चेत्सत्यम् । साध्यतावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणत्वघटितकल्पे दोषाभावेन इष्यतां वा तदेव, तत्रैव मूलतात्पर्यस्य वक्तव्यत्वादिति सार्वभौमैर्व्याख्यातमिति । तथा च साध्यतावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतुसमासाधिकरणाभावप्रतियोगितासामान्यशून्यसाध्यसामानाधिकरण्यं हेतौ व्याप्तिरिष्टा तत्रैव जगदीशस्य तात्पर्यमिति सार्वभौमभट्टाचार्यस्याशयः ।

मूले बह्नित्वावच्छिन्ने प्रतियोगितावदेच्छेकावच्छिन्नत्वप्रदर्शनेन बह्नित्वनियत-(व्यापक) प्रतियोगिताया अपि सत्त्वे सूचिते तस्या व्याप्यवृत्तित्वलाभात् बह्निमान्

धूमादित्यत्र तत्तद्वह्न्यभावमादायाव्याप्तेर्न वारणमिति दूषणं सूचितं भवति। सार्वभौमभट्टाचार्येण यत् प्रतियोगिताया अव्याप्यवृत्तित्वमुक्तम्, तन्न युक्तम्। एवं सति सत्तावान् जातेरित्यत्र हेत्वधिकरणे गुणे प्रतियोगिव्यधिकरणगुणान्यत्वविशिष्ट-सत्त्वाभावस्य सत्त्वेन तत्प्रतियोगिताशून्यत्वस्य साध्येऽसत्त्वादव्याप्तिर्भवति सार्वभौममते। विशिष्टः शुद्धान्नातिरिच्यते इति मन्यमानस्य सार्वभौमभट्टाचार्यस्य मते नोक्तदोषः संभवति। सिद्धान्ते अन्यमते च दोषः संभवत्येव। किञ्च अत एव शब्दाश्रयवान् तज्ज्ञानत्वादित्यत्राव्याप्तिर्दत्ता। एवं शब्दाश्रयवान् तज्ज्ञानत्वादित्यत्र तत्तद्व्यक्त्यभावमादाय (तत्तद्देशस्थगगनाभावमादाय) अत्र मतेऽव्याप्तिः। तादृशप्रतियोगिताशून्यत्वस्य साध्येऽसत्त्वात्।

केचित्तु रूपवान् पृथिवीत्वादित्यत्र विषयितया रूपत्वविशिष्टाभावमादाया-व्याप्तेर्वारणाय तादृशाभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वनिवेशेन तत्तद्व्यक्त्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः। तत्तद्व्यक्तित्वनिष्ठप्रतियोगितावच्छेदकतायां स्वरूपसंबन्धावच्छिन्नत्वस्य सत्त्वेन साध्यतावच्छेदकताघटकसमवायसंबन्धावच्छिन्नत्वस्य तत्रासत्त्वात्, अतोऽवच्छिन्नत्वेन साध्यतालाभाय वह्नित्वावच्छिन्नत्वस्येत्युपादानम्। तथा च साध्यतावच्छेदकता-घटकस्वरूपसंबन्धावच्छिन्नत्वस्य तत्तद्व्यक्त्यभावीयप्रतियोगितावच्छेदकतायां सत्त्वेन तदभावमादाय अत्राव्याप्तिः संभवति, अतो वह्नित्वावच्छिन्नत्वस्येत्यत्र अवच्छिन्नत्व-पदोपादानम्। न चोभयोः स्थलयोर्भेदेन अव्याप्तितादवस्थ्यमिति ग्रन्थविरोधः, वह्नित्वावच्छिन्नतत्तद्व्यक्त्यपेक्षया वह्नेः सामान्येन सामान्यविशेषयोः परस्परविशेषेण भेदात्। यदि वह्निमान् धूमादित्यत्रैवाव्याप्तिर्भवेत् तदा तादवस्थ्यमित्युक्तिः संगच्छेदिति वाच्यम्। तादवस्थ्यस्य केवलाव्याप्तावन्वयेन तथोक्तिसंगतेः। यथापूर्वमव्याप्तिः तथैवेदानीमप्यत्रैवेति भावः। न चाग्रेऽपि अव्याप्ति-र्दास्यते तत्र तादवस्थ्यमिति नोच्यते केवलाव्याप्तेस्तत्रापि सत्त्वादिति वाच्यम्। तदनभिधानस्य (तादवस्थ्यमित्यकथनस्य) अकिञ्चित्करत्वात्। कथमन्यथा **अवच्छेदकत्वनिरुक्तौ** "न चैवानतिरिक्तवृत्तित्वांशवैयर्थ्यमित्यादि"पंक्तौ पारिभाषिकावच्छेद-कत्वापत्तितादवस्थ्यादिति लेखनोपेक्षा घटते। क्वचित् तदुक्तिश्च परस्यातिप्रतिभा-

शून्यताज्ञापनेन पराजयोत्कर्षसूचनायेति प्रागुक्तसाध्यतासमनियतसाध्यकस्थलीय-दोषसद्भाव एव तादवस्थ्यशब्दस्य पारिभाषिकत्वात् नासङ्गतिः। नहि तत्र (तादवस्थ्येत्यत्र) साध्यत्वयोः अवच्छेदकैक्यापेक्षेत्यपि कश्चिद् वदति। तन्न, साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्य पारिभाषिकस्य (स्वानवच्छेदकसंबन्धावच्छिन्नत्व, स्वसामानाधिकरण्याभ्यां साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपकत्वस्य) प्रतियोगितायां विवक्षणीयतया वह्निसाध्यकस्थलेऽपि अव्याप्तिसंभवात्। वह्नित्वावच्छिन्नसाध्यकस्थले एतस्या अव्याप्तेरनुपेक्षणीयत्वात्।

यत्तु प्रतियोगितावच्छेदकताघटकसंबन्धेन तादृशाभावीयप्रतियोगितावच्छेदकविशिष्टभेदस्य साध्ये विवक्षणीयत्वेन प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वं न निवेश्यम्। रूपवान् पृथिवीत्वादित्यत्र विषयितया रूपत्वविशिष्टाभावमादाय नाव्याप्तिः। विषयितया तादृशाभावप्रतियोगितावच्छेदकरूपत्वविशिष्टज्ञानभेदस्य रूपे सत्त्वादिति। तन्न स्वरूपेण गुणभेदविशिष्टसत्तासाध्यके गुणान्यत्वविशिष्टसत्तावान् जातेरित्यत्र सामानाधिकरण्यसंबन्धेन गुणभेदविशिष्टसत्त्वाभावमादायाव्याप्तेः। हेत्वधिकरणे गुणे तेन संबन्धेनैतादृशाभावसत्त्वात्। विषयितासमवायान्यतरसंबन्धेन रूपत्वविशिष्टवान् आत्मघटान्यतरत्वादित्यत्र हेत्वधिकरणे आत्मनि समवायेन रूपत्वविशिष्टस्य, हेत्वधिकरणे घटे विषयितया रूपत्वविशिष्टस्य च साध्यस्यासत्त्वात्। प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्य निवेशे तु नोक्तदोषः। तदसत्त्वेन तत्र तदभावस्य लक्षणाघटकत्वात्। (प्रतियोगितावच्छेदकतायां तदसत्त्वेन तत्र तदभावस्य लक्षणाघटकत्वात्।) प्रतियोगितावच्छेदकतायां च साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वनिवेशेऽपि तत्तद्व्यक्त्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः, किन्तु तन्निवेशेऽपि वह्नित्वावच्छिन्नवान् धूमादित्यत्राव्याप्तिरिति सूचयितुं वह्नित्वावच्छिन्नेत्युक्तम्, इत्यस्यापि सुवचत्वात्। वह्निपदस्य समवायेन वह्नित्वविशिष्टस्यैव बोधकतया नानासंबन्धेन वह्नित्वविशिष्टसाध्यकस्थलेऽव्याप्तेः संभवन्त्याः प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्य निवेशे तत्र तत्राव्याप्तेरभावात् नानासंबन्धेन

वह्नित्वविशिष्टसाध्यकस्थलेऽव्याप्तिलाभाय वह्नित्वाच्छिन्नस्येत्युक्तमिति ज्यायः । इति वह्नित्वावच्छिन्नस्येति ।

अथ अन्यथा व्याचष्टे ।

शब्दार्थत्यागेन तात्पर्यार्थप्रतिपत्त्यनुकूलकृतिमान् दीधितिकार इत्यर्थः । प्रतियोगितावच्छेदकावच्छिन्नस्य प्रतियोगितावच्छेदकतानिरूपकोऽर्थः, स चार्थो न विवक्ष्यते । प्रतियोगितावच्छेदकतानिरूपकस्य प्रतियोगित्वरूपार्थस्य साध्ये सत्त्वेन वह्निमान् धूमादित्यत्र तत्तद्व्यक्त्यभावमादायाव्याप्तेः । किन्तु साध्यतावच्छेदके तादृशप्रतियोगितावच्छेदकभेदस्तात्पर्यविषयीभूतोऽर्थो विवक्ष्यते । तथा हि प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र अवच्छेदकपदस्य अवच्छेदकत्वे लक्षणा, अवच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदस्य यत्पदार्थैकदेशे साध्यतावच्छेदकेऽन्वयः तथा च वह्निमान् धूमादित्यत्र तत्तद्व्यक्त्यभावमादाय नाव्याप्तिः, तादृशप्रतियोगतावच्छेदकतत्तद्व्यक्तित्वभेदस्य साध्यतावच्छेदके वह्नित्वे सत्त्वात् । इत्यन्यथा व्याचष्टे इति ।

अथ तादृशप्रतियोगिताभिन्नप्रतियोगिताकल्पः ।

अथ वह्निमान् धूमादित्यत्र तत्तद्व्यक्त्यभावमादाय अव्याप्तिवारणाय अवच्छेदकपदस्य अवच्छेदकत्वे लक्षणां, यत्पदार्थैकदेशे साध्यतावच्छेदके अन्वयञ्च स्वीकृत्य उक्तव्याख्यानक्लेशोऽनुचितो दीधितिकृताम् । तादृशप्रतियोगितावच्छेदकावच्छिन्नपदशक्यार्थः प्रतियोगितावच्छेदकनिष्ठावच्छेदकतानिरूपकः (प्रतियोगिता रूपः) अर्थः, तद्भेदस्य यत्पदार्थे यद्धर्मावच्छिन्ने प्रतियोगित्वेऽन्वयस्वीकारेऽपि तत्रादोषात् । अवच्छेदकभेदेन तयोः प्रतियोगितयोर्भेदात् । तथा च अव्याप्यवृत्तिसाध्यकस्थले, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरिति फलितम् । न च तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरित्येवोच्यताम्, अलं तादृशाभावीयप्रतियोगितावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताप्रतियोगिकभेदस्य यत्पदार्थे साध्यनिष्ठप्रतियोगित्वे निवेशे-

नेति वाच्यम् । प्रतियोगिव्यधिकरणत्वघटितव्याप्तौ हेत्वधिकरणे साध्यतावच्छेदक-
संबन्धेन प्रतियोग्यसंबन्धित्वस्य तत्संबन्धित्वस्य च तादृशाभावे वा निवेशेनैव
अव्याप्तिदोषाभावेन प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं न
निवेश्यम् । तथा च अव्याप्यवृत्तिसाध्यकस्थले साध्यतावच्छेदकसंबन्धेन
प्रतियोग्यसंबन्धिहेतुसंबन्धिवृत्त्यभावप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिक--
रण्यं व्याप्तिरिति फलितम् । धूमवान् वह्नेरित्यत्र साध्याभावस्य लक्षण-
घटकत्वेन नातिव्याप्तिः । एवं तदात्मानुयोगिकसमवायेन आत्मत्ववान् ज्ञानत्वादि-
त्यत्रापि हेत्वधिकरणे साध्यवद्भिन्नात्मनि आत्मत्वाभावस्य तेनैव संबन्धेन प्रतियोग्य-
संबन्धितया प्रतियोगिव्यधिकरणतदभावप्रतियोगिताभेदस्य साध्यनिष्ठप्रतियोगिताया-
मसत्त्वेन नातिव्याप्तिः ।

प्रतियोगिव्यधिकरणत्वाघटितव्याप्तौ वाच्यं ज्ञेयत्वादित्यत्र व्यधिकरण-
संबन्धेन साध्याभावमादाय अव्याप्तिवारणाय तादृशप्रतियोगितायां साध्यता-
वच्छेदकसंबन्धावच्छिन्नत्वमवश्यं निवेश्यम् । तथा च नोक्तदोषः । साध्यता-
वच्छेदकस्वरूपसंबन्धेन वाच्यत्वस्य केवलान्वयित्वेन तत्संबन्धावच्छिन्नवाच्यत्वा-
भावस्याप्रसिद्धेः । अन्याभावप्रतियोगिताभेदस्य साध्यनिष्ठप्रतियोगितायां
सत्त्वात् । एवं सति व्यभिचारिमात्रेऽतिव्याप्तिः । साध्यतावच्छेदकसंबन्धावच्छिन्न-
तादृशसाध्याभावप्रतियोगिताभिन्नान्यसंबन्धावच्छिन्नप्रतियोगितावत्साध्यसामानाधिक--
रण्यस्य हेतौ सत्त्वात् । साध्यतावच्छेदकसंबन्धतदन्यसंबन्धयोर्भिन्नत्वेन तत्संबन्धा-
वच्छिन्नप्रतियोगितयोरपि भेदात् । व्यभिचारिणः सर्वलक्षणालक्ष्यत्वेन
नेष्टापत्तिं कर्तुं शक्यते । अनवच्छेदकत्वानुसरणे तु नोक्तदोषः । साध्यतावच्छेदके
धूमत्वादौ तादृशाभावप्रतियोगितावच्छेदकत्वस्य सत्त्वेन तत्र तदभावस्यासत्त्वात् ।
ननु हेत्वधिकरणे धूमो नास्तीत्यभावप्रतियोगितावच्छेदकधूमत्वनिष्ठावच्छेदकताक-
प्रतियोगिताभेदस्य जातिमद्धूमनिष्ठप्रतियोगितायां सत्त्वेन धूमवान् वह्नेरित्यत्राति-
व्याप्तिः, हेत्वधिकरणे अयोगोलके जातिमतो वह्नेः सत्त्वेन तत्र जातिमान् नास्तीत्य-
भावस्यासत्त्वात् । अवच्छेदकभेदेन तयोः प्रतियोगितयोर्भेदात् । न च व्याप्यवृत्ति-
साध्यकस्थले साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकहेतुसमानाधिकरण-

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताभिन्नप्रतियोगितानिरूपितनिरवच्छिन्नावच्छेदकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः । अव्याप्यवृत्तिसाध्यकस्थले साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धिहेत्वधिकरणसंबन्ध्यभावप्रतियोगिताभिन्नप्रतियोगितानिरूपितनिरवच्छिन्नावच्छेदकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति विवक्षणे नोक्तदोष इति वाच्यम् । एवं सति दण्डिमान् दण्डसंयोगादित्यत्राव्याप्तेः । तादृशप्रतियोगिताभिन्नसाध्यनिष्ठप्रतियोगितायाः सावच्छिन्नावच्छेदकत्वात् । जात्यखण्डोपाधिव्यतिरिक्तस्य किञ्चिद्धर्मेण भाननियमादिति चेन्न । अव्याप्यवृत्तिसाध्यकस्थले साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धिहेतुसामानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

अव्याप्यवृत्तिसाध्यकस्थले च साध्यतावच्छेदकसंबन्धावच्छिन्नहेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति विवक्षणेनादोषात् । तादृशरूपयोः परस्परभेदात् । अवच्छेदकता च साक्षात्परम्परासाधारणा गृह्यते ।

अथवा साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धिहेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताभिन्नप्रतियोगितावच्छेदकताविशिष्टावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

एवं हेतुसमानाधिकरणाभावीयसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताभिन्नप्रतियोगितावच्छेदकताविशिष्टावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्ति-

प्रतियोग्यवच्छेदकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्युभयत्र विवक्षणेनादोषात् । अवच्छेदकतायाम् अवच्छेदकतावैशिष्टयं च स्वतादात्म्य-स्वनिरूपितत्वान्यतरसंबन्धेन । निरवच्छिन्नसाध्यतावच्छेदकस्थले स्वतादात्म्यं सावच्छिन्नसाध्यतावच्छेदकस्थले स्वनिरूपितत्वं बोध्यम् ।

यद्वा साध्यतावच्छेदकसंबन्धावच्छिन्न हेत्वधिकरणवृत्त्यभावप्रतियोगिता-भिन्नप्रतियोगिताविशिष्टसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति व्याप्य-वृत्तिसाध्यकस्थले । एवं साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धि हेत्वधिकरण-वृत्त्यभावप्रतियोगिताभिन्नप्रतियोगिताविशिष्टसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यव्याप्यवृत्तिसाध्यकस्थले । साध्यतायां प्रतियोगिता वै० स्वनिरूपिता-वच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वस्ववृत्तित्वाभ्याम् । प्रतियोगितायां साध्यतावृत्तित्वञ्च स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्व-संबन्धेन । उभयत्रावच्छेदकतायाम् अवच्छेदकता वै० स्वसामानाधिकरण्य, स्ववृत्तित्व, स्वानवच्छेदकानवच्छिन्नत्व, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतच्चतुष्टय-संबन्धेन । स्ववृत्तित्वं च स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन । अत्र साध्यतायां प्रतियोगितावैशिष्टयनियामकस्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपित-त्वस्यानुक्तौ, इदं ज्ञानं विषयितासंबन्धेन तार्णवह्निमत् वह्नि-ज्ञानत्वादित्यत्रातिव्याप्तिः । हेतुसमानाधिकरणतादृशाभावप्रतियोगिताभिन्नवह्न्य-भावप्रतियोगितायां द्वितीयस्ववृत्तित्वसंबन्धेन तार्णवह्निनिष्ठसाध्यतायाः सत्त्वात् । साध्यतावच्छेदकतायाः वैशिष्टयनियामकानां चतुर्णां संबन्धानां प्रतियोगिता-वच्छेदकतायां सत्त्वेन तदन्यावच्छेदकत्वानिरूपितत्वस्य प्रतियोगितायां सत्त्वात् । वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठसाध्यतावच्छेदकतावैशिष्टयनियाम-कानां चतुर्णां संबन्धानां सत्त्वेन वह्नित्वावच्छेदेन वह्नित्वनिष्ठसाध्यता-वच्छेदकताविशिष्टा भवति प्रतियोगितावच्छेदकता तदन्यावच्छेदकत्वानिरूपित-प्रतियोगिताविशिष्टा भवति साध्यता । उभयोरवच्छेदकतयोर्निरवच्छिन्नत्वेन समवाय-मात्रावच्छिन्नत्वेन च तन्नियामकसंबन्धानां तत्र सत्त्वात् । स्वनिरूपितावच्छेदकता-विशिष्टान्यावच्छेदकत्वानिरूपितत्वस्य प्रतियोगितावैशिष्टयनियामकस्य साध्यताया-

मुपादाने तु नोक्तदोषः । स्वनिरूपितवह्नित्वनिष्ठप्रतियोगितावच्छेदकताया वैशिष्टच-नियामकानां चतुर्णां संबन्धानां तार्णत्वनिष्ठसाध्यतावच्छेदकतायामसत्त्वेन एतस्याः तार्णत्वनिष्ठसाध्यत वच्छेदकतायाः वह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टान्यत्वेन प्रतियोगिविशिष्टत्वस्य साध्यतायामसत्त्वात् ।

साध्यतायां प्रतियोगितावैशिष्टचनियामकस्य स्वसामानाधिकरण्यस्य अनुपादाने, ज्ञानं विषयितासंबन्धेन तार्णवह्निमत् वह्निविषयकज्ञानत्वादित्यत्रैवातिव्याप्तिः । एतत्संबन्धभिन्नतादृशत्रितयसंबन्धेन प्रतियोगितावच्छेदकताविशिष्टा भवति साध्यता-वच्छेदकता । स्वावच्छेदकसमवायसंबन्धावच्छिन्नत्व, स्वानवच्छेदकानवच्छिन्नत्व-संबन्धावच्छिन्नस्ववृत्तित्व, स्वानवच्छेदकानवच्छिन्नत्वानां त्रयाणां साध्यतावच्छेद-कतायां सत्त्वात् । स्वसामानाधिकरण्यस्योपादाने तु नोक्तदोषः । प्रतियोगितावच्छेदक-वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतासामानाधिकरण्यस्य तार्णत्वावच्छेदेन साध्यता-वच्छेदकतायामसत्त्वेन साध्यतावच्छेदकता भवति प्रतियोगितावच्छेदकताविशिष्टान्या तदनिरूपितत्वस्य साध्यतायामसत्त्वेन साध्यता न भवति प्रतियोगिताविशिष्टेति नाति व्याप्तिः ।

प्रथमसंबन्धनियामकघटकस्ववृत्तित्वस्यानुपादाने, इदं ज्ञानं विषयितया जातिमद्वह्निमद् जातिमज्ज्ञानत्वादित्यत्रातिव्याप्तिः । तादृशप्रतियोगिताभिन्ना जातिमान् नास्तीत्यभावप्रतियोगिता तद्वैशिष्टचस्य साध्यतायां सत्त्वात् । स्वसामाना-धिकरण्य स्वावच्छेदकसंबन्धावच्छिन्नत्व स्वानवच्छेदकानवच्छिन्नत्वानां जात्यवच्छेदेन साध्यतावच्छेदकतायां सत्त्वात् । तदन्यावच्छेदकत्वानिरूपितत्वस्य साध्यतायां सत्त्वेन साध्यता भवति प्रतियोगिताविशिष्टा । स्ववृत्तित्वस्योपादाने तु नोक्तदोषः । साध्यतावच्छेदकवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानवच्छेदकजातित्वावच्छिन्नत्वस्य — प्रतियोगितावच्छेदकतायां सत्त्वेन प्रतियोगितावच्छेदकता न भवति साध्यता-वच्छेदकताविशिष्टा किन्तु तदन्यैवेति तन्निरूपितत्वस्यैव प्रतियोगितायां सत्त्वेन साध्यतायाः प्रतियोगितायाम् अवृत्तित्वात् साध्यता न भवति प्रतियोगिताविशिष्टा ।

प्रथमसंबन्धवैशिष्टचनियामकघटकस्य स्वानवच्छेदकानवच्छिन्नत्वस्यानुपादाने, इदं ज्ञानं विषयितया जातिमद् वह्निमत् वह्निज्ञानत्वादित्यत्रातिव्याप्तिः । तादृश-

प्रतियोगिताभिन्नवह्न्यभावप्रतियोगितावैशिष्ट्यस्य साध्यतायां सत्त्वात् । तदन्यावच्छेदकत्वानिरूपितत्वस्य साध्यतायां सत्त्वेन साध्यतायाः प्रतियोगिताविशिष्टत्वात् । एतदुक्तौ च नोक्तदोषः । बह्नित्वनिष्ठप्रतियोगितावच्छेदकताया निरवच्छिन्नत्वेन तदनवच्छेदकजातित्वावच्छिन्नत्वस्य जातिनिष्ठसाध्यतावच्छेदकतायां सत्त्वेन तस्याः प्रतियोगितावच्छेदकताविशिष्टत्वाभावात् ।

प्रथमसंबन्धवैशिष्ट्यनियामकघटकस्य स्वावच्छेदकसंबन्धावच्छिन्नत्वस्यानुपादाने तु कालिकेन बह्नित्वविशिष्टो यः समवायेन बह्नित्वविशिष्टः तस्य विषयितया साध्यतायाम् इदं ज्ञानं विषयितया तादृशबह्निमत् समवायेन बह्नित्वविशिष्टज्ञानत्वादित्यत्रातिव्याप्तिः । तादृशभिन्ना या केवलसमवायसंबन्धावच्छिन्नबह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकप्रतियोगिता तद्वैशिष्ट्यस्य साध्यतायां सत्त्वात् । एतदतिरिक्तेन प्रतियोगितावैशिष्ट्यनियामकसंबन्धघटकोक्तत्रितयसंबन्धेन प्रतियोगितावच्छेदकतावैशिष्ट्यस्य साध्यतावच्छेदकतायां सत्त्वात् । एतदुक्तौ च नोक्तदोषः । प्रतियोगितावच्छेदकतानवच्छेदककालिकसंबन्धावच्छिन्नत्वस्य साध्यतावच्छेदकतायां सत्त्वेन तस्याः प्रतियोगितावच्छेदकताविशिष्टान्यत्वमिति तन्निरूपितत्वस्य साध्यतायां सत्त्वेन साध्यतायाः प्रतियोगिताविशिष्टत्वाभावात् ।

साध्यतायां प्रतियोगितावैशिष्ट्यनियामकद्वितीयसंबन्धस्यानुपादाने इदं ज्ञानं विषयितया वह्निमत् तार्णवह्निज्ञानत्वादित्यत्रातिव्याप्तिः । तादृशाभावप्रतियोगिताभिन्नतार्णवह्न्यभावप्रतियोगितावैशिष्ट्यस्य वह्निनिष्ठसाध्यतायां सत्त्वात् । वह्नित्वावच्छेदेन निरवच्छिन्नसाध्यतावच्छेदकतायां निरवच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावैशिष्ट्यस्य सत्त्वेन तदन्यावच्छेदकत्वानिरूपितत्वस्य साध्यतायां सत्त्वात् । तदुक्तौ तु नोक्तदोषः । साध्यतावच्छेदकतानवच्छेदकतार्णत्वत्वावच्छिन्नत्वस्य प्रतियोगितावच्छेदकतायां सत्त्वेन साध्यतावच्छेदकताविशिष्टान्यतार्णत्वत्वावच्छिन्नावच्छेदकतानिरूपकत्वस्यैव प्रतियोगितायां सत्त्वात्, साध्यतायाः प्रतियोगित्वावृत्तित्वेन वृत्तित्वसंबन्धेन साध्यतायाः प्रतियोगिताविशिष्टत्वाभावात् ।

वृत्तित्वनियामकवैशिष्टयनियामकसंबन्धघटकस्वसामानाधिकरण्यस्यानुपादाने अत्रैवातिव्याप्तिः । एतदतिरिक्तसाध्यतावच्छेदकतावैशिष्टयनियामकोक्तत्रितयसंबन्धेन प्रतियोगितावच्छेदकतायाः वह्नित्वावच्छेदेन साध्यतावच्छेदकताविशिष्टत्वेन तदन्यावच्छेदकत्वानिरूपकत्वस्य प्रतियोगितायां सत्त्वात् । साध्यतायाः प्रतियोगितावृत्तित्वेन वृत्तित्वसंबन्धेन साध्यता भवति प्रतियोगिताविशिष्टेति भवति तत्रातिव्याप्तिः । एतदुक्तौ च नोक्तदोषः । तार्णत्वावच्छेदेन प्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठनिरवच्छिन्नसाध्यतावच्छेदकतासामानाधिकरण्यस्य अभावेन साध्यतावच्छेदकताविशिष्टान्यतार्णत्वनिष्ठसावच्छिन्नावच्छेदकतानिरूपकत्वस्यैव प्रतियोगितायां सत्त्वेन साध्यतायाः प्रतियोगित्वावृत्तित्वात् । वृत्तित्वसंबन्धेन प्रतियोगिताविशिष्टा साध्यता न भवतीति नातिव्याप्तिः ।

द्वितीयसंबन्धनियामकघटकस्य स्ववृत्तित्वसंबन्धस्यानुक्तौ तु इदं ज्ञानं विषयितया जातिमत्, जातिमद्वह्निविषयकज्ञानत्वादित्यत्रातिव्याप्तिः । तादृशाभावप्रतियोगिताभिन्नजातिमद्वह्नयभावप्रतियोगितावैशिष्टयस्य साध्यतायां सत्त्वात् । जात्यवच्छेदेन प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावैशिष्टयस्य स्ववृत्तित्वातिरिक्ततत्त्रितयसंबन्धेन सत्त्वात् । एतदुक्तौ तु नोक्तदोषः । जातिमद्वह्नयभावप्रतियोगितानिरूपितनिरवच्छिन्नवह्नित्वनिष्ठावच्छेदकतानवच्छेदकजातित्वावच्छिन्नत्वस्य साध्यतावच्छेकतायां सत्त्वेन प्रतियोगितावच्छेदकताविशिष्टान्यजातिनिष्ठावच्छेदकतानिरूपकत्वस्यैव साध्यतायां सत्त्वेन साध्यतायाः प्रतियोगित्वाविशिष्टत्वात् ।

द्वितीयसंबन्धनियामकघटकस्वानवच्छेदकानवच्छिन्नत्वस्यानुपादाने तु इदं ज्ञानं विषयितया वह्निमत् जातिमद्वह्निज्ञानत्वादित्यत्रातिव्याप्तिः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताभिन्नजातिमद्वह्नयभावप्रतियोगितावैशिष्टयस्य साध्यतायां सत्त्वात् । साध्यतावच्छेदकताविशिष्टान्यावच्छेकत्वानिरूपकत्वस्य प्रतियोगितायां सत्त्वेन स्ववृत्तित्वसंबन्धेन साध्यतायाः प्रतियोगितावृत्तित्वात् स्ववृत्तित्वसंबन्धेन प्रतियोगितावैशिष्टयस्य साध्यतायां सत्त्वात् । एतदुक्तौ च नोक्तदोषः । साध्यतावच्छेदकवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानवच्छेदक-

जातित्वावच्छिन्नजातिनिष्ठप्रतियोगितावच्छेदकतायां सत्त्वेन तद्विशिष्टान्यावच्छेदकता सैव, तन्निरूपकत्वस्य प्रतियोगितायां सत्त्वेन साध्यतायाः प्रतियोगित्वावृत्तित्वात् साध्यतायां वृत्तित्वसंबन्धेन प्रतियोगितावैशिष्ट्यस्याभावात् ।

द्वितीयसंबन्धनियामकघटकस्य स्वावच्छेदकसंबन्धावच्छिन्नत्वस्यानुपादाने तु समवायेन वह्नित्वविशिष्टसाध्ये व्यभिचारिणि कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टाभावप्रतियोगितामादायातिव्याप्तिः (इदं ज्ञानं समवायेन वह्नित्वविशिष्टवत् कालिकसमवायोभयसंबन्धेन वह्नित्वविशिष्टवह्नि ज्ञानत्वादित्यत्रातिव्याप्तिः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताभिन्नकालिकसमवायोभयसंबन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपकप्रतियोगितावैशिष्ट्यस्य समवायसंबन्धावच्छिन्नवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकताकसाध्यतायां सत्त्वात् । स्वावच्छेदकसंबन्धावच्छिन्नत्वातिरिक्तसंबन्धत्रयस्य साध्यतावच्छेदकतायाः प्रतियोगितावच्छेदकतायां वैशिष्ट्यनियामकस्य सत्त्वेन साध्यतायाः प्रगियोगितावृत्तित्वमिति स्ववृत्तित्वसंबन्धेन साध्यतायाः प्रतियोगिताविशिष्टत्वात् । एतत्संबन्धोक्तौ तु नोक्तदोषः । साध्यतावच्छेदकतानवच्छेदककालिकसंबन्धावच्छिन्नत्वस्य प्रतियोगितावच्छेदकतायां सत्त्वेन तन्निरूपकत्वस्य प्रतियोगितायां सत्त्वेन तदनिरूपितत्वाभावात् साध्यतायाः प्रतियोगितायामवृत्तित्वेन स्ववृत्तित्वसंबन्धेन प्रतियोगिताविशिष्टत्वस्य साध्यतायामसत्वादिति चेन्न । वृत्त्यनियामकसंबन्धस्य प्रतियोगित वच्छेदकत्वपक्षे व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणस्य साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकहेतुसमानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामनाधिरकण्यं व्याप्तिरित्यस्य घनी प्रमेयत्वादित्यत्र नातिव्याप्तिः । स्वामित्वसंबन्धेन तत्र धनाभावस्य लक्षणघटकत्वेन तदीयप्रतियोगिताया एव साध्ये सत्त्वात् । वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वपक्षे तत्रातिव्याप्तेः । साध्यतावच्छेकदसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धया साध्यतावच्छेदकसंबन्धावच्छिन्नप्रयोगिताकसाध्याभावस्य लक्षणाघटकत्वात् ।

न च साध्यतावच्छेकस्वामित्वसंबन्धावच्छिन्नप्रतियोगित्वस्याप्रसिद्धया

नातिव्याप्तिः । तादृशप्रतियोगिताभिन्नसाध्यनिष्ठप्रतियोगित्वाप्रसिद्धेरिति वाच्यम् । एवं सति धनी चैत्रत्वादित्यत्राव्याप्तेः । वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वपक्षे साध्यतावच्छेकसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धया तादृशप्रतियोगिताकाभावस्य लक्षणाघटकत्वात् ।

सिद्धान्ते तु नोक्तदोषः । वृत्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वपक्षेऽपि हेतुसमानाधिकरणाभावीयप्रतियोगितायां यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यस्य सत्वात् । एवञ्च वृत्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वपक्षे प्रतियोगिताभिन्नप्रतियोगिताकल्पस्य निर्दुष्टत्वेऽपि उभयसाधारणपक्षे अनवच्छेदकत्वघटितसिद्धान्तस्यावश्यकत्वमिति बोध्यम् । किञ्च गुरुधर्मस्य प्रतियोगितावच्छेदकत्वकल्पे प्रतियोगिताभिन्नप्रतियोगिताकल्पस्य निर्दुष्टत्वेऽपि तस्य तदनवच्छेदकत्वपक्षे संयोगेन प्रमेयवह्निमान् धूमादित्यत्राव्याप्तिः । हेतुसामानधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितायां साध्यतावच्छेदकगुरुधर्मावच्छिन्नत्वस्याप्रसिद्धया तादृशप्रतियोगिताभिन्नसाध्यनिष्ठप्रतियोगित्वाप्रसिद्धेः । सिद्धान्तेऽनवच्छेदकत्वकल्पे तु नोक्तदोषः । तादृशाभावीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् । प्रमेयधूमवान् वह्नेरित्यत्रातिव्याप्तिस्तु हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षया वारणीया । गुरुधर्मस्यापि पारिभाषिकप्रतियोगितावच्छेदकत्वस्वीकारात् । तथा च अव्याप्यवृत्तिसाध्यकस्थले प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकं तद्भिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् ।

व्याप्यवृत्तिसाध्यकस्थले च साध्यतावच्छेदकसंबन्धावच्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकं तदभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् । न च प्रतियोगिताभिन्नप्रतियोगिताकल्पेऽपि तत्तद्दोषो वारणीयः । प्रतियोगिव्यधिकरणहेतु-

समानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूपकप्रतियोगिताभिन्नप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मरूपसाध्यतावच्छेदकावच्छिन्न-सामानाधिरण्यं व्याप्तिः । व्याप्यवृत्तिसाध्यकस्थले साध्यतावच्छेदकसंबन्धावच्छिन्नहेतु-समानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसमानाधि-करणाभावप्रतियोगितानवच्छेकं तद्धर्मरूपसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति । एवञ्च प्रमेयवह्निमान् धूमादित्यत्र नाव्याप्तिः । तादृशप्रतियोगिताभिन्न-प्रतियोगितावच्छेदकवह्नित्वस्य प्रमेयवह्नित्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितान-वच्छेंदकत्वेन तद्धर्मावच्छिन्नसामानाधिकरण्यस्य धूमे सत्वादिति वाच्यम् । एवं सति धूमवान् वह्नेरित्यत्रातिव्याप्तेः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरण भावप्रतियो-गिताभिन्नप्रतियोगितावच्छेदकद्रव्यत्वस्य धूमत्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितान-वच्छेदकत्वेन तद्धर्मावच्छिन्नसामानाधिकरण्यस्य वह्नौ सत्त्वात् । न च साध्यता-वच्छेदके प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगिताया अनतिरिक्तवृत्तित्वरूपम् अवच्छेदकत्वं विवक्षणीयम् । तच्च स्वव्यापकतत्कत्वरूपम् । स्वस्य (धर्मस्य) व्यापिका प्रतियोगिता यस्य (धर्मस्य) तत्त्वम् । तथा च तादृशप्रतियोगिताभिन्नप्रतियोगितानतिरिक्तवृत्तिसाध्यतावच्छेदकावछिन्नसामानाधिकरण्यं व्याप्तिरिति फलितम् । एवं च प्रमेयवह्निमान् धूमादित्यत्र तादृशप्रतियोगिता-भिन्नवह्निनिष्ठसंयोगसंबन्धावच्छिन्नप्रतियोगितायां प्रमेयवह्नित्वव्यापकत्वस्य सत्त्वेन नाव्याप्तिरिति वाच्यम् । तथा सति सामानाधिकरण्यसंबन्धेन घटभेदविशिष्टसाध्यकसद्धेतौ साध्याभावस्य गुरुधर्मावछिन्नाभावतयाऽप्रसिद्धचा घटभेदाभावीयप्रतियोगित्वातिरिक्तवृत्तितया साध्यतावच्छेदकस्येत्यव्याप्तेः । (सामानाधिकरण्यसंबन्धेन घटभेदविशिष्टपटत्ववान् तद्व्यक्तित्वादित्यत्राव्याप्तेः । घटभेदविशिष्टपटत्वत्वस्य घटभदेत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकत्वात् तद्-वच्छिन्नाया तादृशप्रतियोगिताभिन्नप्रतियोगिताया अप्रसिद्धचा तदनतिरिक्तवृत्ति-त्वस्याप्यप्रसिद्धेः । तादृशाभावीयप्रतियोगिताभिन्ना घटभेदत्वावच्छिन्ना या प्रतियोगिता तदतिरिक्तवृतित्त्वस्य घटभेदविशिष्टपटत्वत्वे साध्यतावच्छेदके सत्वात् ।) एवं विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेश्च । प्रतियोगिव्यधिकरणहेतु

समानाधिकरणाभावीयप्रतियोगिताभिन्नसत्तात्वावच्छिन्नप्रतियोगितायाः गुणकर्मान्यत्वविशिष्टसत्तात्वव्यापकत्वेन तादृशप्रतियोगितानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य साध्यतावच्छेदके गुणकर्मान्यत्वविशिष्टसत्तात्वे सत्त्वात्। न च समवायेन गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिवारणाय, प्रतियोगिव्यधिकरणहेतुसमानाधिकरणभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदकनिष्ठव्याप्यतानिरूपितव्यापकतावत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षणीयमिति नोक्तदोषः। विशिष्टसत्तात्वस्य सत्तात्वाव्यापकत्वादिति वाच्यम्। साध्यतावच्छेदकगुणकर्मान्यत्ववैशिष्ट्यसत्तात्वोभयघटकसत्तात्वनिष्ठव्यापकतानिरूपितव्याप्यत्वस्य तादृशप्रतियोगितावच्छेदके सत्तात्वे सत्त्वात्। स्वस्मिन् स्वव्याप्यत्वस्वव्यापकत्वयोः सर्वसंमतत्वात्। न च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदकं यादृशसाध्यतावच्छेदकावच्छिन्नव्यापकतानिरूपितव्याप्यतावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षणे नोक्तदोषः। तादृशप्रतियोगितावच्छेदके सत्तात्वे तादृशव्याप्यतानवच्छेदकत्वस्य सत्त्वादिति वाच्यम्। विकल्पासहत्वेन कथयितुम शक्यत्वात्। तथा हि प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदके साध्यतावच्छेदकावच्छिन्नव्यापकतानिरूपितव्याप्यतावच्छेदकत्वं हि किं साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाभाववन्निष्ठाधिकरणतानिरूपितनिरूपकतानवच्छेदकत्वम्? तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदकं साध्यतावच्छेदकसंबन्धावच्छिन्नयादृशसाध्यतावच्छेदकधर्मावच्छिन्नाभाववन्निष्ठाधिकरणतानिरूपितनिरूपकतानवच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितम्। अथवा साध्यतावच्छेदके प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदकावच्छिन्नव्यापकत्वावच्छेद्यत्वपर्यवसायि। तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदकावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितम्। किं वा प्रतियोगिव्यधिकरणहेतुसमानाधिकर-

णाभावीयप्रतियोगिताभिन्नप्रतियोगितावच्छेदकं यत्किञ्चिद्धर्मावच्छिन्नव्याप्यता-निरूपितव्यापकत्वपर्यवसायि। तथा च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीय-प्रतियोगिताभिन्नप्रतियोगितावच्छेदकं यत्किञ्चिद्यादृशसाध्यतावच्छेदकावच्छिन्न-साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभाववन्निष्ठाधिकरणतानिरूपितनिरूपकता-नवच्छेदकं तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितम्। तत्र नाद्यः, इदं वाच्यं ज्ञेयत्वादित्यत्राव्याप्तेः। स्वरूपसंबन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रति-योगिताया अप्रसिद्धया तादृशप्रतियोगिताकाभाववन्निष्ठाधिकरणतानिरूपितनिरूपकता-नवच्छेदकत्वस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्न प्रतियोगितावच्छेदके वाच्यत्वत्वेऽप्रसिद्धेः।

न द्वितीयः, पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्राव्याप्तेः। प्रतियोगि-व्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितावच्छेदकप्रमेयत्वाधिकरण-जलादिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके पृथिवी-तरभेदे सत्त्वेन तादृशप्रतियोगितानवच्छेदकत्वस्य तत्रासत्वात्। साध्यतावच्छेदके तादृशप्रतियोगितावच्छेदकावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकत्वस्यासत्वात्। न हि भवति प्रमेयव्यापको जलादिभेदः। न तृतीयः, प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तेः। प्रमेयधूमत्वस्य वह्निसमानाधिकरणप्रतियोगिव्यधि-करणाभावप्रतियोगिताभिन्नप्रतियोगितावच्छेदकयत्किञ्चित्पर्वतीयवह्नित्वावच्छिन्नसंब-न्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन तस्य (प्रमेयधूमत्वस्य) तादृश-प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकत्वात्। किञ्च साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य प्रमेयधूमत्वे सत्त्वेन तादृशप्रतियोगितावच्छेदकत्वाभावाच्च। न च तादृशाभावीय-प्रतियोगिताभिन्नप्रतियोगितावच्छेदकस्य विषयितयाऽभाववति विषयितया अवृत्तित्वं व्याप्यत्वम्। तादृशप्रतियोगितावच्छेदकस्य विषयितया संबन्धिनि विषयितया अभावा-प्रतियोगित्वं व्यापकत्वं प्रकृते गृह्यते। तथा च वाच्यं ज्ञेयत्वादित्यत्र नाव्याप्तिः। तादृशप्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नस्य विषयितया साध्यतावच्छेदकवाच्यत्व-त्वावच्छिन्नाभाववति अवृत्तित्वेन विषयितया तादृशप्रतियोगितावच्छेदकावच्छिन्नवति

विषयितया अभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति वाच्यम् । विषयितया व्याप्यव्यापकभावस्य विवक्षणे प्रमेयवह्निमान् धूमादित्यत्राव्याप्तेः । विषयितया तादृशप्रतियोगिताभिन्नप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नवति वह्नि विषयकज्ञाने साध्यतावच्छेदकप्रमेयवह्नित्वावच्छिन्नस्य विषयितया असत्त्वेन साध्यतावच्छेदकस्य व्यापकतानवच्छेदकत्वात् । वह्निज्ञानवतः पुरुषस्य अहं प्रमेयवह्निं जानामीत्यनुव्यवसायाभावेन उभयज्ञानीयविषयितयोः परस्परभिन्नत्वात् । न च प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरित्यस्य प्रमेयवह्निमान् धूमादित्यत्राव्याप्तिः । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन प्रमेयवह्नेः तादृशप्रतियोगितानाश्रयत्वात् । सिद्धान्ते अनवच्छेदकत्वानुसरणे तु नोक्तदोषः । तादृशप्रतियोगितानवच्छेदकत्वस्य प्रमेयवह्नित्वे सत्त्वादिति वाच्यम् । एवमपि गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे प्रमेयधूमवान् वह्नेरित्यत्रातिव्याप्तेः सिद्धान्ते विद्यमानत्वात् । पारिभाषिकावच्छेदकत्वानुसरणेऽपि न निर्वाहः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकधूमत्वस्य विषयितया प्रमेयधूमत्वविशिष्टप्रमेयधूमविषयकज्ञानवृत्त्यभावप्रतियोगितावच्छेदकत्वेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तत्त्वं पारिभाषिकप्रतियोगितानवच्छेदकत्वम् । तस्य साध्यतावच्छेदके प्रमेयधूमत्वेऽसत्त्वात् । अतो विषयितया गुरुसाध्यकहेतोरुभयपक्षयोरलक्ष्यत्वस्य स्वीकरणीयत्वात् । तेन विषयितया गुरुधर्मावच्छिन्नसाध्यकहेतावव्याप्तिः प्रतियोगिताभिन्नप्रतियोगिताकल्पे अनुपादेयेति ।

हेतुसमानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरिति व्याप्यवृत्तिसाध्यकव्याप्तिलक्षणे व्यधिकरणसंबन्धेन साध्याभावमादायासंभववारणाय तादृशाभावप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं निवेश्यम् । तथा च तादृशाभावीयप्रतियोगिताभिन्नसाध्यनिष्ठप्रतियोगितायाः प्रसिद्धया नासंभवः । एवञ्च धनी चैत्रत्वादित्यादौ वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वकल्पेऽव्याप्तिः । स्वामित्वसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः ।

अतः प्रतियोगिताभिन्नप्रतियोगिताकल्पमुपेक्ष्य अनवच्छेदकत्वानुसरणं कृतं दीधितिकृता । अव्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणे प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणव्यधिकरणसंबन्धावच्छिन्न (अनभिप्रेतसंबन्धावच्छिन्न) प्रतियोगिताकसाध्याभावमादाय असंभववारणाय साध्यतावच्छेदकसंबन्धेन प्रतियोग्यसंबन्धित्वं हेत्वधिकरणे निवेश्यम् । उभयलक्षणे उभयत्र साध्यतावच्छेदकसंबन्धस्य निवेशः ।

अथास्तु साध्यतावच्छेदकसंबन्धेनैव तयोः व्याप्यव्यापकभावः । प्रतियोगिवैयधिकरण्यं तु साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावरूपमेव हेत्वधिकरणे वाच्यम् । तथा च हेत्वधिकरणे साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावः तादृशप्रतियोगिताभिन्नप्रतियोगितावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितम् ।

तथा च व्यभिचारिमात्रे अभावमात्रस्यैव प्रतियोगिव्यधिकरणत्वेन तादृशप्रतियोगिताभिन्नप्रतियोगित्वाप्रसिद्धयैव नातिव्याप्तिरिति चेन्न । संयोगेन धूमाभावीयप्रतियोगितावद्वान् वह्नेरित्यत्रातिव्याप्तेः । साध्यतावच्छेदकधूमाभावप्रतियोगित्वावच्छिन्नाधिकरणत्व, हेत्वधिकरणवृत्त्यभावीयप्रतियोगित्वावच्छिन्नाधिकरणत्वयोः निरूपकैक्येनैक्यात् तादृशाधिकरणत्वद्वयाप्रसिद्धया साध्याभावो न लक्षणघटक इत्यभावान्तरप्रतियोगिताभिन्नप्रतियोगितायाः साध्ये सत्त्वात् । न च साध्यतावच्छेदकावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्ना, एवं हेतुसमानाधिकरणाभावप्रतियोगित्वावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपितप्रतियोगिताकाभावत्वेनात्राभावः उभयाभावत्वेन हेत्वधिकरणे विवक्ष्यते । उभयाभावप्रतियोगितया द्वित्वविशिष्टतत्तदधिकरणत्वद्वयं न विवक्ष्यते तदा नोक्तदोषः, धूमाभावप्रतियोगित्वावच्छिन्नाधिकरणत्व, हेत्वधिकरणवृत्त्यभावप्रतियोगित्वावच्छिन्नाधिकरणत्वघटितस्य तादृशोभयाभावस्य हेत्वधिकरणे अयोगोलके सत्त्वेन तादृशाभावप्रतियोगित्वस्यैव साध्ये सत्त्वात् तत्रातिव्याप्तेरभावादिति वाच्यम् । घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्ववत्त्वसंयोगान्यतरसंबन्धेन घटः पटवान् तद्-

व्यक्तित्वादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धयाव्याप्त्यापत्तेः । घटाभावप्रतियोगित्वावच्छिन्नसाध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नाधिकरणत्वस्य घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्ववत्त्वावच्छिन्नाधिकरणत्वस्य च द्वयोरधिकरणत्वयोः हेत्वधिकरणे भूतले सत्त्वेन तादृशाधिकरणत्वाभावस्यासत्त्वात् । घटाभावभिन्नाभावास्तु सर्वे घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्ववत्त्वसंबन्धेन प्रतियोगिसमानाधिकरणा एवेति । न च यादृशप्रतियोगित्वावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वमात्रं यादृशप्रतियोगित्वावच्छिन्नाधिकरणत्वनिष्ठप्रतियोगितायां निवेश्यं न तु साध्यतावच्छेदकावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वमिति तदा नोक्तदोषः । घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्ववत्त्वसंबन्धावच्छिन्नघटत्वावच्छिन्नघटाभावीयप्रतियोगित्वावच्छिन्नाधिकरणत्वस्यान्यत्र प्रसिद्धस्य हेत्वधिकरणेऽसत्त्वेन तादृशाधिकरणत्वप्रतियोगिकोभयाभावस्य हेत्वधिकरणे तद्भूतले सत्त्वेन घटाभावो भवति प्रतियोगिव्यधिकरणः तदीयप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वेन भूतलं घटत्वावच्छिन्नाप्रतियोगिकस्ववृत्तिवाच्यत्ववत्त्वसंबन्धेन पटवत् तद्व्यक्तित्वादित्यत्र नाव्याप्तिरिति वाच्यम् । (साध्यतावच्छेदकसंबन्धावच्छिन्नत्वम् अधिकरणतायां न निवेश्यम् । तथा-चान्यसंबन्धेन घटाभावो लक्षणघटको भविष्यतीति तत्र नाव्याप्तिरिति शङ्कया भावः ।) यादृशप्रतियोगित्वावच्छिन्नाधिकरणतायां 'प्रतियोगितावच्छेदकसंबन्धावच्छिन्नाधेयतानिरूपितत्वस्य निवेशे (साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्याधेयतायामकथने) व्यधिकरणस्वरूपादिसंबन्धेन धूमाभावमादाय धूमवान् वह्नेरित्यादि व्यभिचारिणि अतिव्याप्त्यापत्तेः । व्यधिकरणसंबन्धेन साध्याभावीयप्रतियोगित्वावच्छिन्नस्य अधिकरणाप्रसिद्धया सा प्रतियोगिता न यादृशपदग्राह्या तदन्या या प्रतियोगिता तद्भिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वात् । न च साध्यतावच्छेदकसंबन्धावच्छिन्नाधेयतानिरूपितत्वं यादृशप्रतियोगित्वावच्छिन्नतादृशाधिकरणत्वे निवेशनीयमिति नोक्तदोषः । हेत्वधिकरणे अयोगोलके धूमत्वावच्छिन्नप्रतियोगित्वावच्छिन्नसाध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वस्यान्यत्र पर्वतादौ प्रसिद्धस्य असत्त्वेन तादृशप्रतियोगित्वस्यैव साध्ये सत्त्वेन नातिव्याप्तिरिति वाच्यम् । एवं सति वह्निप्रतियोगिकसंयोगेन वह्निमान् धूमादित्यत्राव्याप्तेः । साध्यतावच्छेदक-

संबन्धावच्छिन्नयादृशप्रतियोगित्वावच्छिन्नाधेयतानिरूपिताधिकरणत्वस्याप्रसिद्धया पारिभाषिकव्यधिकरणाभावस्याप्रसिद्धेः । सिद्धान्तेऽनवच्छेदकत्वघटितकल्पे तु नोक्तदोषः । साध्यतावच्छेदकसंबन्धे यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावः तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्यस्य वक्ष्यमाणत्वेन साध्यभिन्नघटाद्यभावीयप्रतियोगित्वस्य लक्षणघटकत्वात् । न चास्मिन् कल्पेऽपि साध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणत्वहेत्वधिकरणवृत्त्यभावीययादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वैतद्प्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावः, तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरिति विवक्षणे नोक्तदोषः । वह्निप्रतियोगिकसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये पर्वतानुयोगिकत्वसत्त्वेऽपि प्रतियोगितावच्छेदकघटत्वावच्छिन्नाधिकरणत्वप्रतियोगिकत्वाभावेन घटाभावोऽत्र प्रतियोगिव्यधिकरणस्तदीयप्रतियोगिताभिन्नवह्नित्वावच्छिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वादिति वाच्यम् । एवं सति धूमवान् वह्नेरित्यत्रातिव्याप्त्यापत्तेः । साध्यतावच्छेदकधूमत्वावच्छिन्नाधिकरणत्व, हेत्वधिकरणीभूतायोगोलकवृत्त्यभावप्रतियोगित्वावच्छिन्नाधिकरणत्वयोरैक्येन द्वित्वाभावाद् धूमाभावो न लक्षणघटकस्तदन्याभावीयप्रतियोगिताभिन्नधूमत्वावच्छिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य वह्नौ सत्त्वात् । न च साध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणताप्रतियोगिकस्वरूपसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेतुसमानाधिकरणाभावीययादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वैतद्द्वयप्रतियोगिकत्वहेत्वधिकरणीभू यत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावस्तादृश–प्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरित्यत्राधिकरणतायां संबन्धविशेषस्यानिवेशेन विभिन्नसंबन्धावच्छिन्नाधिकरणताद्वयं प्रसिद्धयति, एकधर्मावच्छिन्नाधिकरणत्वानामपि विभिन्नसंबन्धावच्छिन्नानां संबन्धभेदेन परस्परभेदादिति वाच्यम् । एवंसति धूमवान् वह्नेरित्यत्रातिव्याप्तेस्तादवस्थ्यात् । साध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणत्वप्रतियोगिकस्वरूपसंबन्धसामान्ये तादृशाभाव-

प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्व, साध्यतावच्छेदकावच्छिन्नाधिकरणत्वैतद्द्वय-प्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयं नास्तीत्याकारका-भावस्यैव तादृशप्रतीतत्वेन तत्र द्वित्वस्य प्रतियोगितावच्छेदककोटौ एकधर्मावच्छेदेन (साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेत्वधिकरणवृत्त्यभावीयप्रतियोगितावच्छिन्ना-धिकरणत्वावच्छेदेन) भासमानतया साध्यतावच्छेदकावच्छिन्नाधिकरणतात्व हेत्वधिकरण-वृत्त्यभावप्रतियोगित्वावच्छिन्नाधिकरणतात्व व्याप्यत्वविशिष्टपर्याप्तेरेव तद्गतद्वित्व-संबन्धत्वमिति तादृशसंबन्धेन तद्गतद्वित्वमेव तादृशोभयाभावप्रतियोगितावच्छेदकं न त्वधिकरणतात्वमिति तादृशोभयाभावप्रतियोगितावच्छेदकत्वस्य तादृशाधिकरणता द्वयनिष्ठाधिकरणतात्वेऽसत्त्वेन तादृशेतरवारकपर्याप्तिनिवेशेन धूमवान् वह्नेरित्यत्राति-व्याप्तिवारणासंभवात् । साध्यतावच्छेदकावच्छिन्नाधिकरणतात्वतादृशाभावप्रति-योगितावच्छेदकावच्छिन्नाधिकरणतात्वगतद्वित्वस्याभावेन तादृशाभावस्याप्रसिद्ध्या धूमाभावभिन्नाभावस्यैव लक्षणघटकत्वेन तदीयप्रतियोगिताभिन्नप्रतियोगितायाः साध्ये धूमे सत्त्वात् । न चैवमपि साध्यतावच्छेदकावच्छिन्नाधिकरणतायां हेतुसमानाधिकरणा-भावीयप्रतियोगित्वावच्छिन्नाधिकरणतायां च किञ्चित्संबन्धावच्छिन्नत्वं निवेश्यम् । तथा च विशेषाभावम् (संयोगसंबन्धावच्छिन्नसाध्यतावच्छेदकधूमत्वावच्छिन्नाधिकर-णत्व, समवायसंबन्धावच्छिन्नतादृशधूमाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वैतद्द्वय-प्रतियोगिकत्व, यत्किञ्चिद्धेत्वधिकरणव्यक्त्यनुयोगिकत्वोभयाभावम्) आदाय नोक्त-दोषः । अत्राधिकरणतात्वस्यापि तादृशोभयाभावप्रतियोगितावच्छेदकत्वम् । तथा च तादृशाधिकरणतात्वस्यापि तादृशोभयाभावप्रतियोगितावच्छेदकत्वम् । तथा च तादृशा-धिकरणताद्वयवृत्त्यधिकरणतात्वावच्छिन्नप्रतियोगिताकतादृशोभयाभावो भवतीति धूमा-भावो लक्षणघटकस्तदीयप्रतियोगितायाः साध्ये सत्त्वान्नातिव्याप्तिः, आधेयतावच्छेदकयोः संबन्धयोर्भेदेन तादृशाधिकरणतयोर्भेद इति वाच्यम् । एवंसति धूमवान् वह्नेरित्यत्राति-व्याप्तिविरहेऽपि वह्नित्वावच्छिन्नप्रतियोगिकसंयोगेन वह्निमान् धूमादित्यत्राव्याप्त्या-पत्तेः । अत्र विभिन्नसंबन्धावच्छिन्नतादृशाधिकरणताद्वयप्रतियोगिकत्व, हेत्वधिकरणी-भूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावस्य तादृशसंबन्धे सत्त्वेन पूर्वस्येव वह्न्य-भावस्य लक्षणघटकत्वापत्त्या तदीयप्रतियोगित्वस्य साध्ये सत्त्वात्, अत्राव्याप्तेरेव ।

साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणताप्रतियोगिकस्वरूप संबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणत्वप्रतियोगिकत्वहेतुसमानाधिकरण तादृशाभावप्रतियोगितावच्छिन्नाधिकरणत्वप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद् व्यक्त्यनु ोगिकत्वैतत्त्रितयनिष्ठप्रतियोगिताकाभावो न निवेश्यः । न वा साध्यतावच्छेदकसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद् व्यक्त्यनुयोगिकत्वैतत्त्रितयाभावो निवेश्यः । तन्निवेशे च साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये तादृशत्रितयाभावः, तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिः । अथवा साध्यतावच्छेदकसंबन्धसामान्ये तादृशत्रितयाभावः, तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिः । धूमवान् वह्नेरित्यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेतुसमाधिकरणाभावीयधूमत्वावच्छिन्नप्रतियोगित्वावच्छिन्नाधिकरणत्वयोरैक्यन तादृशाधिकरणतागतत्रित्वाभावेन त्रित्वस्य प्रतियोगितानवच्छेदकत्वेन साध्याभावो न लक्षणघटकः, किन्तु घटाद्यभाव एव तदीयप्रतियोगिताभिन्नधूमत्वावच्छिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वात् तत्र भवत्यतिव्याप्तिः । अधिकरण ायां किञ्चित्संबन्धावच्छिन्नत्वनिवेशे विभिन्नसंबन्धावच्छिन्नतादृशाधिकरणत्वद्वयप्रतियोगिकत्व, यत्किञ्चिद्धेत्वधिकरणव्यक्त्यनुयोगिकत्वैतत्त्रितयाभावस्य तादृशसंबन्धसामान्ये सत्त्वेन साध्याभावस्य लक्षणघटकत्वान्न तत्रातिव्याप्तिः । एवं सति वह्निप्रतियोगिकसंयोगेन वह्निमान् धूमादित्यत्र तादृशविभिन्नसंबन्धावच्छिन्नाधिकरणत्वद्वयप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतत्त्रितयाभावस्य तादृशसंबन्धसामान्ये सत्त्वेन साध्याभावस्य लक्षणघटकत्वमिति तदीयप्रतियोगितायाः साध्ये सत्त्वात् तत्राव्याप्तिः । एवं साध्यतावच्छेदकसंबन्धसामान्ये तादृशत्रितयाभावस्य कथने धूमवान् वह्नेरित्यत्रातिव्याप्तिः । अधिकरणतायां किञ्चित्संबन्धावच्छिन्नत्वनिवेशे वह्निप्रतियोगिकसंयोगेन वह्निमान् धूमादित्यत्राव्याप्तिर्बोध्या । न च त्रित्वमनिवेश्य चतुष्टयादेः तादृशाधिकरणत्वगतस्य वारणाय तन्निवेशः कर्तुं शक्यते । तथा हि साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेत्व-

धिकरणवृत्तितादृशाभावीयप्रतियोगित्वावच्छिन्नाधिकरणत्व, यत्किञ्चिद्धेत्वधिकरण व्यक्त्यनुयोगिकत्वैतत्त्रितयनिष्ठत्रित्वनिष्ठावच्छेदकताभिन्ना या या अवच्छेदकता तद-निरूपिता या प्रतियोगिता तत्प्रतियोगितानिरूपकोऽभावः साध्यतावच्छेदकसंबन्धा-वच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्यवृत्तिः तादृश-प्रतियोगिताभिन्नप्रतियोगितावत् साध्यसामानाधिकरण्यं व्याप्तिः । अथवा साध्यता-वच्छेदकसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेत्वधिकरणवृत्ति तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद् व्यक्त्य-नुयोगिकत्वैतत्त्रितयनिष्ठत्रित्वनिष्ठावच्छेदकताभिन्ना तादृशाधिकरणतात्वनिष्ठा-वच्छेदकताभिन्ना तादृशानुयोगिकत्वत्वनिष्ठावच्छेदकताभिन्ना या या अवच्छेदकता तत्तदवच्छेदकत्वानिरूपितप्रतियोगिताकाभावः तादृशप्रतियोगिताभिन्नप्रतियोगिता-वत्साध्यसामानाधिकरण्यं व्याप्तिरिति वाच्यम् । एवं सति धूमवान् वह्नेरित्यादावति व्याप्तेः । तादृशत्रित्वनिष्ठावच्छेदकताभिन्ना तादृशानुयोगिकत्वत्वनिष्ठावच्छेदकता-भिन्ना या साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्व हेत्व-धिकरणवृत्तितादृशाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वगतैकत्व, हेत्वधिकरणीभूत यत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतद्गतैकत्वैतदेकत्वद्वयवदधिकरणत्वद्वयगतद्वित्वं तन्निष्ठा वच्छेदकता तन्निरूपितत्वस्य तादृशाधिकरणत्वद्वयाभावीयप्रतियोगितायां सत्त्वेन साध्याभावो न लक्षणघटकः किन्तु घटाद्यभावस्तदीयप्रतियोगिताभिन्नधूमत्वावच्छिन्न-प्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वात् । एवं साध्यतावच्छेदकसंबन्ध-सामान्ये, किं वा साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वीय-स्वरूपसंबन्धसामान्ये तत्तत्प्रत्येकाभावो न निवेश्यः । तत्तत्प्रत्येकं तत्र तत्र सत्त्वेन तत्तत्प्रत्येकाभावस्य तत्र तत्रासत्त्वात् । तथा च धूमवान् वह्नेरित्यत्र साध्याभावो न लक्षणघटकः तदन्यघटाद्यभावप्रतियोगिताभिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिता-वत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वात् ।

अथ साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणतात्व-निष्ठावच्छेदकताभिन्ना, हेत्वधिकरणाभावीयतादृशप्रतियोगितावच्छेदकावच्छिन्ना-धिकरणतात्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपितप्रतियोगिता-

वच्छेदकतात्वनिष्ठावच्छेदकताभिन्ना प्रतियोगितात्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपित यादृशप्रतियोगितानिष्ठावच्छेदकताभिन्ननिरूपकत्वनिष्ठा वच्छेदकताभिन्नहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वनिष्ठावच्छेदकताभिन्नोभयत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकोऽभावस्तादृशसंबन्धसामान्ये तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिः । तथा च साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेतुसमानाधिकरणतादृशाभावीययादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वैतद्द्वयप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावः तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरिति व्याप्तिलक्षणघटकोभयाभावीयप्रतियोगितावच्छेदकतायां केवलेतरवारकपर्याप्तिनिवेशः । तथा च धूमवान् वह्ने रित्यत्र नातिव्याप्तिः । साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेतुसमानाधिकरणप्रतियोगिव्यधिकरणधूमाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वयोरैक्येऽपि धूमाभावो भवति लक्षणघटकः । तादृशाधिकरणत्वोभयनिष्ठप्रतियोगितायां तत्तदधिकरणत्वगतद्वित्वनिष्ठावच्छेदकतानिरूपितत्वस्यासत्त्वेऽपि तत्तदवच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वस्य सत्त्वात् । अथवा साध्यतावच्छेदकसंबन्धावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वाभावो हेत्वधिकरणवृत्तिः, तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यं व्याप्तिरिति विवक्षणेऽपि धूमवान् वह्ने रित्यत्र नातिव्याप्तिः । तादृशस्वरूपसंबन्धावच्छिन्नतादृशाभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्नाधिकरणत्वाभावस्य हेत्वधिकरणे अयोगोलके सत्त्वेन तदीयप्रतियोगित्वस्यैव धूमे सत्त्वाच्चेति चेन्न । प्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपसंबन्धेन प्रमेयवान् वाच्यत्वादित्यत्र हेतुसमानाधिकरणानां सर्वेषाम् अभावानां पारिभाषिकप्रतियोगिव्यधिकरणत्वेन तदीयप्रतियोगिताभिन्नतादृशसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तेः । तथाहि प्रमेयत्वावच्छिन्नस्वरूपेण, तादात्म्येन च प्रमेयस्य केवलान्वयित्वेन प्रमेयत्वावच्छिन्नतत्तत्संबन्धावच्छिन्नप्रतियोगिताकाभावो न प्रसिद्धः । केवलान्वयितावच्छेदकसंबन्धेन तेन रूपेण केवलान्वयिनः सर्वत्र सत्त्वेन तेन-

रूपेण तेन संबन्धेन तदभावस्यासत्त्वात्। प्रतियोगिमति तदभावो न भवति। तं प्रति प्रतियोगिनः प्रतिबन्धकत्वात्। संयोगसमवायादिसंबन्धेन प्रमेयत्वेन प्रमेयाभावानां सर्वेषां, प्रतियोगिव्यधिकरणत्वेन हेतुसमानाधिकरणानां तेषां या प्रतियोगिता तद्भिन्नसाध्यनिष्ठ· प्रतियोगित्वाप्रसिद्धया प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतावसत्त्वात्। समवायेन प्रमेयत्वेनप्रमेयाभावप्रतियोगितावच्छेदकं समवेतत्वं धर्मविधया अवच्छेदकं संसर्गविधया समवायः। संयोगेन प्रमेयाभावप्रतियोगितावच्छेदकं धर्मविधया द्रव्यत्वं संसर्गविधया संयोगः। कालिकसंबन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकं धर्मविधया समवेतप्रमेयत्वादिकम्। विषयित्वादीनां वृत्त्यनियामकत्वेन प्रतियोगितानवच्छेदकत्वात्। तेन संबन्धेन प्रमेयत्वेन न प्रमेयाभावः। प्रतियोगिव्यधिकरणवृत्तिमदभावाप्रतियोगित्वं केवलान्वयित्वम्। तादात्म्य, स्वरूपाद्यवच्छिन्नप्रतियोगितायां प्रमेयत्वावच्छेद्यत्वाभावात् तादृशप्रतियोगिताभिन्नप्रतियोगित्वाऽप्रसिद्धया अव्याप्तेरेव। एतेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताभिन्न प्रतियोगितावच्छेदकं न प्रमेयवह्नित्वादि गुरुधर्मो भवति। संभवति लघौ गुरौ तदभावात्। तथा च प्रमेयवह्निमान् धूमादित्यत्राव्याप्तेर्वारणाय साध्यतावच्छेदकसंबन्धावच्छिन्न साध्यतावच्छेदकावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्ना हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतात्वनिष्ठावच्छेदकताभिन्ना तादृशाधिकरणत्वगतद्वित्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपितप्रतियोगित्वनिष्ठावच्छेदकताभिन्नानिरूपकत्वनिष्ठावच्छेदकताभिन्नोभयत्वनिष्ठा (तादृशाधिकरणत्वप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वनिष्ठोभयत्वनिष्ठा) वच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकाभावः, तादृशप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्व, साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वोभयाभाववत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः।

एवं साध्यतावच्छेदकसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्व हेतुसमानाधिकरणाभावीययादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वैतदुभय, हेत्व-

धिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावः तादृशप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्व, साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वोभयाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः ।

प्रमेयवह्नित्वे तादृशाभावीयप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य सत्त्वेऽपि साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्याभावेन तादृशोभयाभावो वर्तते, प्रमेयवह्निमान् धूमादित्यत्राव्याप्तिर्न भवति । वह्निमान् धूमादित्यत्र वह्नित्वे साध्यतावच्छेदसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽपि तादृशघटाद्यभावप्रतियोगिताभिन्नवह्नित्वावच्छिन्नप्रतियोगितानवच्छेदकत्वस्यासत्त्वेन तदुभयाभावो वर्तते । अथवा साध्यतावच्छेदकसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्व, हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकावच्छिन्नयादृशप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतत्त्रितयाभावः, तादृशप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्व, साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वोभयाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । अत्रापि साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वत्वनिष्ठावच्छेदकताभिन्ना, एवं हेत्वधिकरणवृत्त्यभावीयप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वत्वनिष्ठावच्छेदकताभिन्ना एवं हेत्वधिकरणीभूतयत्किञ्चिद् व्यक्त्यनुयोगिकत्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदेकता तदनिरूपित तत्त्रितयनिष्ठप्रतियोगिताकाभावः साध्यतावच्छेदकसंबन्धसामान्ये बोध्यः । तादृशप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्व, साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकत्वोभयाभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । व्यभिचारिणि तादृशप्रतियोगिताभिन्नप्रतियोगिता साध्यनिष्ठा न भवतीति नातिव्याप्तिरित्यपि प्रत्युक्तम् । (प्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपसंबन्धेन प्रमेयसाध्यकसद्धेतौ प्रमेयत्वादित्यत्राव्याप्तिरिति प्रत्युक्तम्) । नच प्रतियोगितावच्छेदकतायां द्वितीयायां साध्यतावच्छेदकताघटकसबन्धावच्छिन्नत्वस्यानिवेशनीयतया विषयित्वानुयोगित्वादिना प्रमेयविशिष्टाभावप्रतियोगिताया एव तादृशप्रतियोगिताभिन्नायाः संभवः प्रतियोगिवैयधिकरण्यघटकप्रतियोगितावच्छेदकनिष्ठावच्छेदकतायां संबन्धावच्छिन्नत्वप्रवेशेन तादृशाभावस्य प्रतियोगिवैयधिकरण्यासंभवात् इति वाच्यम् ।

(न च साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबन्धावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये साध्यतावच्छेदकावच्छिन्नाधिकरणत्व, हेतुसमानाधिकरणाभावीय यादृश प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वैतद्द्वयप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावः, इत्यत्रोभयाभावघटकयादृशप्रतियोगिता-तद्भिन्नप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नत्वस्यानिवेशेन तादृशप्रतियोगिताभिन्ना या विषयित्वसंबन्धावच्छिन्नावच्छेदकताकप्रमेयरूपसाध्यनिष्ठा प्रतियोगिता प्रसिद्धा तस्याः साध्ये सत्त्वात् प्रमेयप्रतियोगिकस्वरूपेण प्रमेयवान् वाच्यत्वादित्यत्र नाव्याप्तिः । प्रतियोगिवैयधिकरण्यघटकप्रतियोगितावच्छेदकतायां (साध्यतावच्छेदकताघटक) संबन्धावच्छिन्नत्वस्य अप्रवेशे तु लक्षणघटकाभावे प्रतियोगिवैयधिकरण्यासंभवः । विषयित्वसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकलक्षणघटकाभावोऽपि स्वरूपसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगित्वाश्रयप्रतियोगिसमानाधिकरण इति सर्वे लक्षणघटकाभावाः प्रतियोगिसमानाधिकरणा एवेति प्रतियोगिव्यधिकरणलक्षणघटकोऽभावोऽप्रसिद्धः स्यात् । अतो हेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नावच्छेदकतानिरूपितत्वमवश्यं निवेश्यं तद्भिन्नप्रतियोगितावच्छेदकतायां संबन्धावच्छिन्नत्वं न निवेश्यमिति वाच्यम् । समवायसंबन्धेन प्रमेयाभावप्रतियोगितायाः स्व (प्रमेयत्व) समानाधिकरण तत्तद्धर्मवत्वरूपपरम्परासंबन्धेन लाघवेन (द्रव्यत्वाद्यनेकधर्मे प्रतियोगितावच्छेदकत्वकल्पनापेक्षया लाघवेन) प्रमेयत्वमेव प्रतियोगितावच्छेदकमिति प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसमवायसंबन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावप्रतियोगित्वस्य साध्ये सत्त्वेन तद्भिन्नप्रतियोगितायाः साध्येऽसत्त्वात् । प्रमेयप्रतियोगिकस्वरूपेण प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तेः । एकधर्मावच्छिन्नैकसंबन्धावच्छिन्नप्रतियोगिताया ऐक्यात् । एवं संसर्गीयप्रतियोगितायां द्वित्वावच्छिन्नत्वस्यास्वीकारे साध्यतावच्छेदकावच्छिन्न साध्यतावच्छेकसंबन्धावछिन्नाधिकरणत्वीयस्वरूपसंबन्धसामान्ये साध्यतावच्छेकावछिन्नाधिकरणत्व, हेतुसमानाधिकरणाभावीययादृशप्रतियोगितावच्छेकावछिन्नाधिकरणत्वैतद्द्रयप्रतियोगिकत्व, हेत्वधिकरणीभूतयत्किञ्चद्व्यक्त्यनुयोगिकत्वोभयाभावस्य विशेषरूपेण संसर्गताया अस्वीकारे च कथयितुमशक्यत्वेन प्रमेयप्रतियोगिक-

स्वरूपेण प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तेः । व्याप्यवृत्तिसाध्यकसद्धेतौ वाच्यं ज्ञेयत्वादित्यत्र हेत्वधिकरणे समवायेन वाच्यत्वाभावमादायाव्याप्तिवारणाय हेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धावछिन्नत्वं निवेशनीयं तथा च धनी चैत्रत्वादित्यत्र वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वपक्षेऽव्याप्तिः स्वामित्वसंबन्धावछिन्नप्रतियोगिताकलक्षणघटकाभावस्याप्रसिद्धेः । सिद्धान्ते तु न दोषः । हेतुसमानाधिकरणप्रतियोगिव्यकरणाभाव प्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्व, यत्संबन्धावछिन्नत्वोभयाभावः, तेन संबन्धेन तद्धर्मावच्छिन्नसम्बन्धित्वं हेतौ व्याप्ति-प्रकारतायां प्रसिद्धस्य स्वामित्वसंबन्धावछिन्नत्वस्य धनत्वावच्छिन्नत्वस्योभयस्य हेतुसमानाधिकरणाभावीयप्रतियोगितायामभावेन तत्संबन्धावच्छिन्नत्वतद्धर्मा वच्छिन्न संबन्धित्वस्य हेतौ सत्त्वात् ।

प्रतियोगिताभिन्नप्रतियोगिताकल्पे प्रतियोगितार्धर्मिकोभयाभावस्य कथयि-तुमशक्यत्वेन प्रमेयप्रतियोगिकस्वरूपेण प्रमेयवान् वाच्यत्वात्, धनी चैत्रत्वादित्यत्र चा-व्याप्तिर्दुर्वारा ।

तथाहि स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतुसमाना-धिकरणाभावभिन्नाभावीयप्रतियोगितासामान्ये (स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नप्रतियोगितासामान्ये) साध्यतावच्छेकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्व, साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्न-त्वोभयाभावः । अथवा साध्यतावच्छेदकसंबन्धानवछिन्नत्व, साध्यतावच्छेदकधर्मा-वच्छिन्नत्वोभयाभावः । किं वा । साध्यतावच्छेदकसंबन्धावच्छिन्नत्व, साध्यतावच्छेकधर्मानवच्छिन्नत्वोभयाभावो निवेश्यः । तथा च तेन संबन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । आद्ये, वह्निमान् धूमादित्यत्रा-व्याप्तिः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणसंयोगसंबन्धावछिन्नप्रतियोगिताक घटाद्यभावभिन्नकालिकसंबन्धावच्छिन्नघटत्वावच्छिप्रतियोगिताकाभावीय प्रतियोगितायां सामान्यान्तर्गतायां साध्यतावच्छेकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्व, साध्यतावच्छेदक धर्मातिरिक्तधर्मावच्छिन्नत्वोभयस्यैव सत्त्वेन तस्याः प्रतियोगितायाः लक्षणाघटकत्वात् (तत्रोभयाभावस्यासत्त्वेनोभयाभावस्य तादृशप्रतियोगित्वाव्यापकत्वापत्तेः ।) न द्वितीयः,

संयोगेन वह्निमान् धूमादित्यत्रैवाव्याप्तेः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणा भावभिन्नाभावीयकालिकसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितायां सामान्यान्तर्गतायां साध्यतावच्छेदकसंबन्धानवच्छिन्नत्व, साध्यतावच्छेदकधर्मावच्छिन्नत्वोभयस्यैव सत्त्वात् । नान्यः, संयोगेन वह्निमान् धूमादित्यत्राव्याप्तेः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावभिन्नाभावीयसंयोगसंबन्धावच्छिन्नद्रव्यत्वावच्छिन्नप्रतियोगितासामान्ये साध्यतावच्छेदकसंबन्धावच्छिन्नत्व, साध्यतावच्छेदकधर्मानवच्छिन्नत्वोभयस्यैव सत्त्वात् । तादृशोभयाभावस्य तादृश प्रतियोगित्वाव्यापकत्वात् नच प्रतियोगितावच्छेदकसंबन्धेन-प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगिताभिन्नयत्किञ्चित्प्रतियोगितायां यत्साध्यतावच्छेदकसम्बन्धातिरिक्तसंबन्धावच्छिन्नत्व, यत्साध्यतावच्छेदकधर्मातिरिक्तधर्मावच्छिन्नत्वोभयाभावः तेन संबन्धेन तद्धर्मावच्छिन्नसामाधिकरण्यं हेतौ व्याप्तिरिति विवक्षायां नोक्तदोषः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरण संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावीयप्रतियोगिताभिन्नसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसंयोगातिरिक्तसंबन्धावच्छिन्नत्व,यत्साध्यतावच्छेदकवह्नित्वातिरिक्तघटत्वादिधर्मावच्छिन्नत्वोभयाभावस्य सत्त्वादिति वाच्यम् । एवं सति धूमवान् वह्नेरित्यत्राति व्याप्तेः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणधूमाभावीयप्रतियोगिताभिन्नसंयोगसंबन्धावच्छिन्न द्रव्यत्वावच्छिन्नयत्किञ्चित् प्रतियोगितायां यत्साध्यतावच्छेदकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्व, यत्साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्नत्वोभयाभावः तेन संयोगसंबधेन तद्धर्मावच्छिन्नसामानाधिरण्यस्य वह्नौ सत्त्वात् । न च गुरुधर्मावच्छिन्नसाध्यकप्रमेयवह्निमान् धूमादित्यत्र अव्याप्तिवारणाय प्रतियोगि व्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगित्वावृत्तियत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । वृत्तिता च । स्वविशिष्टसंबन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगितातादात्म्यसंबन्धन । वह्निसमानाधिकरण प्रतियोगिव्यधिकरणधूमाभावप्रतियोगितायां साध्यतावच्छेदकं धूमत्वं वर्तत एवेति धूमवान् वह्नेरित्यत्र नातिव्याप्तिः । धूमत्वविशिष्टधूमसंबन्धि पर्वतादिवृत्ति घटाद्यभावप्रतियोगितानवच्छेदकधूमत्वावच्छिन्नप्रतियोगितातादात्म्यस्य धूमत्वावच्छिन्न

संयोगसंबन्धावच्छिन्नप्रतियोगितायां सत्त्वेन तत्र धूमत्वस्य वृत्तित्वमिति तत्र धूमत्वे साध्यतावच्छेदके अवृत्तित्वस्यासत्त्वात् । संयोगेन प्रमेयवह्निमान् धूमादित्यत्र नाव्याप्तिः। धूमसमानधिकरणप्रतियोगिव्यधिकरणघटाद्यभावप्रतियोगितायां धूमत्वविशिष्ट धूमसंबन्धिपर्वतादिवृत्तिघटाद्यभावीयप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्न प्रतियोगितातादात्म्यस्यासत्त्वेन प्रमेयवह्नित्वस्य तत्र प्रतियोगितायामवृत्तित्वमिति संयोगेन प्रमेयवह्नित्वावच्छिन्नसामानाधिकरण्स्य धूमे सत्त्वादिति वाच्यम् । एवंसति धूमवान् वह्नेरित्यत्रातिव्याप्तेः। वह्निसमानाधिकरणप्रतियोगिव्यधिकरणधूमाभावप्रतियोगितायां धूमत्वविशिष्टधूमसंबन्धिपर्वतादिवृत्यभावीययत्किञ्चित्प्रतियोगितानवच्छेदकद्रव्यत्वावच्छिन्नप्रतियोगितातादात्म्यस्यासत्त्वेन तेन संबन्धेन धूमत्वस्य तत्प्रतियोगितायाम् अवृत्तित्वात् तदवच्छिन्नसामानाधिकरण्यस्य वह्नौ सत्त्वात् ।

प्रतियोगिताभिन्नप्रतियोगिताकल्पे सिद्धान्तापेक्षया च यमेव विशेषम् आलोचयामः । प्रतियोगिताभिन्नप्रतियोगिताकल्पे प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यतावच्छेदकस्यावृत्तित्वम् स्वविशिष्टसंबन्धिनिष्ठाभाव प्रतियोतिानवच्छेदकावच्छिन्नप्रतियोगितातादात्म्यसंबन्धो गुरुभूतः परम्परासंबन्धः । सिद्धान्ते च कल्पे संसर्गविषयानुगमे लघूभूतस्य तादृशानवच्छेदकधर्मावच्छिन्नत्व मात्रस्य संसर्गत्वमिति ।

एतेन प्रतियोगितायां निविष्टस्य हेतुमन्निष्ठाभावीयप्रतियोगित्वावृत्ति यद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेकावच्छिन्नप्रतियोगितातादात्म्यम् तद्धर्मावच्छिन्नसामानाधिकण्यस्य व्याप्तित्वमिति निरस्तम् । सिद्धान्तकल्पापेक्षयाऽनतिविशेषात् । सिद्धान्ते प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिता सामान्यनिष्ठस्य गुरुधर्मावच्छिन्नसाध्यकाव्याप्तिवारकोभयाभावस्य अत्र (प्रयियोगिता भिन्नप्रतियोगिताकल्पे)साध्यप्रतियोगित्वावृत्तित्वस्य चैकपर्यवसायित्वादिति ध्येयम् । (अनवच्छेदकत्वानुसरणसिद्धान्तकल्पापेक्षया अत्र कल्पे नातिविशेषाच्च । तथाहि सिद्धान्ते प्रमेयवह्निमान् धूमादित्यत्रातिव्याप्तेर्वारणायप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वमनिवेश्य यद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकानवच्छिन्नत्व, यत्संबन्धावछिन्नत्वोभयाभावस्तेन संबन्धेन

तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्युच्यते । अत्र कल्पे च प्रतियोगिव्यधिकरण-हेतुसमानाधिकरणाभावप्रतियोगित्वावृत्तियद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगितातादात्म्यं तद्धर्मावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति विशेषः । सिद्धान्ते तादृशप्रतियोगितासामान्यनिष्ठस्य गुरुधर्मावच्छिन्नसाध्यका-व्याप्तिवारकोभयाभावस्य, अत्र कल्पे तादृशप्रतियोगित्वावृत्तित्वस्य तादृशप्रतियोगिता-तादात्म्यनिष्ठस्य चैकपर्यवसायित्वादिति ध्येयम् ।

यत्तु एतत्कल्पे प्रमेयवह्निमान् धूमादित्यत्राव्याप्तिवारणाय साध्यतावच्छेदके प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिताभिन्नप्रतियोगितानवच्छेदकत्व, यत्किञ्चिद्धेत्वधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकतानवच्छेदकत्वोभयाभावस्तद्धर्मा-वच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । प्रमेयवह्नित्वे तादृशप्रतियोगिता-नवच्छेदकत्वस्य सत्त्वेऽपि तादृशनिरूपकतानवच्छेदकत्वस्याभावेन तादृशोभयाभाव इति न तत्राव्याप्तिः । निरूपकतावच्छेदकत्वाभावश्च साध्यतावच्छेदकसंबन्धा-वच्छिन्ननिरूपकतावच्छेदकत्वीयस्वरूपसंबन्धावच्छिन्नप्रतियोगिताको बोध्यः । धूमवान् वह्नेरित्यत्र वह्निसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगिताभिन्नसंयोग-संबन्धावच्छिन्नद्रव्यत्वावच्छिन्नयत्किञ्चित्प्रतियोगितानवच्छेदकत्वस्य हेत्वधिकरणी-भूतयत्किञ्चिद्व्यक्त्ययोगोलकनिष्ठाधिकरणतानिरूपितनिरूपकतानवच्छेदकत्वस्य च धूमत्वे सत्त्वेन तदुभयाभावस्य तत्रासत्त्वान्नातिव्याप्तिः । वह्निमान् धूमादित्यत्र ना-व्याप्तिः । साध्यतावच्छेदके वह्नित्वे धूमसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रति-योगिताभिन्नसंयोगसंबन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगितानवच्छेदकत्वाभावेन तादृशो-भयाभावस्य सत्त्वात् ।

नन्वव्याप्त्यतिव्याप्त्योरभावेन तादृशस्वरूपेण तादृशनिरूपकतावच्छेदकत्वाभावः साध्यतावच्छेदके किमर्थमुच्यते ? अयोगोलकनिष्ठाधिकरणतानिरूपितकालिकसंबन्धा-वच्छिन्ननिरूपकतावच्छेदकत्वस्य धूमत्वे सत्त्वेन तादृशनिरूपकतानवच्छेदकत्वाभावात् तादृशोभयाभावस्य साध्यतावच्छेदके धूमत्वे सत्त्वेन तदवच्छिन्नसाध्यसामानाधिकरण्यस्य वह्नौ सत्त्वात् । धूमवान् वह्नेरित्यत्रातिव्याप्तिः । तदुक्तौ च नोक्तदोषः । कालिकसंबन्धा-

वच्छिन्न धूमनिष्ठनिरूपकतावच्छेदकतायाः साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नधूम-निष्ठनिरूपकतावच्छेदकत्वीयस्वरूपसंबन्धस्य व्यधिकरणत्वेन एतत्संबन्धावच्छिन्नप्रति-योगिताकतदभावस्य साध्यतावच्छेदके धूमत्वे सत्त्वेन तादृशोभयाभावस्य धूमत्वे सत्त्वात्। तन्न। प्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपेण प्रमेयवान् वाच्यत्वादित्यत्र प्रतियोगिव्यधि-करणहेतुसमानाधिकरणाभावप्रति योगिताभिन्नप्रतियोगित्वस्याप्रसिद्धयाव्याप्त्यापत्तेः । तादात्म्यप्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपान्यतरसंबन्धेन प्रमेयस्य केवलान्वयित्वेन तयो-रन्यतरेण प्रमेयत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः । समवाय, संयोगादिसंबन्धा-वच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगितायाश्च हेतुसमानाधिकरणप्रतियोगिव्यधिकरणा-भावीयत्वमिति तादृशप्रतियोगिताभिन्नप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेताव-सत्त्वेन तत्राव्याप्तेः । न च हेत्वधिकरणे साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यता-वच्छेदकावच्छिन्नाधिकरणत्व, तादात्म्यसंबन्धावच्छिन्नहेतुसमानाधिकरणाभावीय-यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावः तादृशप्रति योगिताभिन्नप्रति-योगितावच्छेदकं यद्धर्मविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मावच्छिन्न-सामानाधिकरण्यं हेतौ व्याप्तिः। एवं सति प्रमेयवह्निमान् धूमादित्यत्र नाव्याप्तिः । हेत्वधिकरणे पर्वते संयोगसंबन्धावच्छिन्नप्रमेयवह्नित्वावच्छिन्नाधिकरणत्वस्य सत्त्वेऽपि घटवान्नेतिभेदीयप्रतियोगित्वावच्छिन्नतादात्म्यसंबन्धावच्छिन्नसंबन्धितानिरूपितसंबन्धि-त्वस्य पर्वतेऽसत्त्वेन तत्र तदुभयाभावो वर्तत इति तत्प्रतियोगिताभिन्नसंयोग-संबन्धावच्छिन्नवह्नित्वावच्छिन्ना प्रतियोगिता तदवच्छेदकं वह्नित्वं प्रमेयवह्नित्वविशिष्ट-संबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तादृशप्रमेयवह्नित्वावच्छिन्नसामानाधिकरण्यस्य धूमे सत्त्वात्। धूमवान् वह्नेरित्यत्र हेत्वधिकरणे अयोगोलके तादृशधूमाधिकरणत्वस्य तादृशप्रतियोगितावच्छेदक धूमत्वावच्छिन्नाधिकरणत्वस्य चासत्त्वेन तदुभयाभावो वर्तते तादृशप्रतियोगिताभिन्नसाध्यनिष्ठप्रतियोगिताया असत्त्वेन तादृशप्रतियोगिताभिन्नप्रति-योगितावत्साध्यसामानाधिकरण्यस्य हेतावसत्त्वात् नातिव्याप्तिरिति वाच्यम् । प्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपेण प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तेः । तादृशप्रति-योगिताभिन्नप्रतियोगिताया असत्त्वेन तादृशप्रतियोगितावत्साध्यसामानाधिकरण्यस्य हेतावसत्त्वात्। प्रमेयत्वावच्छिन्नप्रतियोगिकस्वरूपेण प्रमेयत्वेन साध्याभावोऽप्रसिद्धः ।

समवाय, संयोगादिसंबन्धेन प्रमेयाभावस्य प्रतियोगिव्यधिकरणहेतुसमानाधिकरणत्वेन तदीयप्रतियोगित्वस्यैव साध्ये सत्त्वात् ।

कश्चित्तु हेत्वधिकरणे साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्व, हेत्वधिकरणवृत्त्यभावीययादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वोभयाभावः तादृशप्रतियोगिताभिन्नप्रतियोगितावच्छेदकं-यद्धर्मविशिष्टनिष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र प्रमेयवह्निमान् धूमादित्यत्राव्याप्तिः । साध्याधिकरणत्वस्य गुरुधर्मावच्छिन्नत्वेन तद्घटितोभयाभावस्य गुरुधर्मावच्छिन्नप्रतियोगिताकत्वेनाप्रसिद्धेः । संयोगेन प्रमेयधूमवान् वह्नेरित्यत्रातिव्याप्तेश्च । प्रमेयधूमत्वावच्छिन्नाधिकरणत्वस्य गुरुधर्मत्वेन तद्घटितोभयाभावस्याप्रसिद्धया साध्याभावीयप्रतियोगितायाः यादृशप्रतियोगितापदेनाग्राह्यतया तादृशघटत्वावच्छिन्नप्रतियोगिताभिन्नसाध्यनिष्ठधूमत्वावच्छिन्नप्रतियोगि ा-वत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वात् ।

